नैर्ऋत्यां पश्चिमाभिमुखस्तप्तचामीकराभश्चतुश्शृङ्गो द्विशीर्षस्सप्तहस्तश्शङ्खचक्राज्यदर्वीस्रुक्स्रुवजुह्वपधरस्त्रिपादो रक्तवस्त्रधरस्सर्वाभरणभूषितो दक्षिणवामयोस्स्वाहास्वधायुक्तो यज्ञो यज्ञं सर्वदेवमयं पुण्यं क्रतुमिति ।

पश्चिमे पश्चिमाभिमुखश्चतुर्भुजस्सर्वाभरणभूषितः कनकाभः श्यामाम्बरधरः पवित्रीक्षोणीभ्यां युक्तोऽच्युतोऽच्युतमपरिमितैश्वर्यं श्रीपतिमिति ।

वायव्ये पश्चिमाभिमुखस्स्फटिकाभश्श्यामाम्बरधरोऽभयवरदहस्तः श्रीवत्साङ्कस्सर्वाभरणभूषितः कमलावनीभ्यां युक्तो नारायणो नारायणं जगन्नाथं देवदेवं त्रयीमयमिति ।

---

‡ पाशेति पाठान्तरम् । † एतदादर्शान्तरे न ।

परिवारदेवताः ।

उत्तरे चोत्तराभिमुखः प्रवालाभो नवसप्तपञ्चफणान्वितानन्तोत्सङ्गे आसीनः पुष्पाम्बरधरस्सर्वाभरणभूषितश्चतुर्भुजश्शङ्खचक्रधरः प्रमोदायिनीमहीयुक्तोऽनिरुद्धोऽनिरुद्धं महान्तं वैराग्यं सर्वतेजोमयमिति ।

ऐशान्यां प्राङ्मुखस्तरुणादित्यसङ्काशश्चतुर्भुजः शङ्खचक्रधरः श्रीवत्सवक्षास्सर्वाभरणसंयुक्तः श्वेतवस्त्रोत्तरीयोपवीती दक्षिणवामयोरिन्दिराधरणीभ्यां युक्तः पुण्यः पुण्यं पुण्यात्मकं पुण्यमूर्तिं पुण्यदायिनमिति ।

द्वितीयावरणदेवाः ।

द्वितीयावरणे प्राच्यां वराहः प्राङ्मुखश्श्यामाभश्चतुर्भुजश्शङ्खचक्रधरस्सर्वाभरणभूषितो रक्ताम्बरो वराहाननः श्रीभूमिभ्यां सहितो वराहो वराहं वरदं भूमिसन्धारणं वज्रदंष्ट्रमिति ।

आग्नेय्यां प्राङ्मुख इन्दीवराभो हेमाम्बरधरश्चतुर्भुजश्शङ्खचक्रधरस्सर्वाभरणसंयुक्तः कमलावनीभ्यां युक्तस्सुभद्रस्सुभद्रं सुमुखं सुखप्रदं सुखदर्शनमिति ।

दक्षिणे दक्षिणाभिमुखो नारसिंहः श्वेताभो रक्तवस्त्रधरश्चतुर्भुजश्शङ्खचक्रधरोऽभयकट्यवलम्बितहस्तस्सिंहाननः श्रीभूमिसहितो नारसिंहो नारसिंहं तपोनाथं महाविष्णुं महाबलमिति ।

परिवारदेवताः ।

नैर्ऋत्यां पश्चिमाभिमुखो हेमाभः श्यामाम्बरधरश्चतुर्भुजः शङ्खचक्रधरः किरीटाद्याभरणान्वितः पद्मास्थिराभ्यां युक्त ईशितात्मा ईशितात्मेशं वरदं सर्वेशं ईशितात्मानमिति ।

पश्चिमे पश्चिमाभिमुखो वामनो ब्रह्मचारी वकुलफलाभो द्विभुजश्छत्रदण्डधरस्समेखलः कौपीनवासास्सोपवीतकृष्णाजिनधरः पवित्रपाणिर्वामनो वामनं वरदं काश्यपमदितिप्रियमिति ।

वायव्ये पश्चिमाभिमुखो नीलाभः पीताम्बरधरो लक्ष्मीधरणीभ्यां युक्तस्सर्वोद्वहस्सर्वेशं सर्वाधारं सर्वज्ञं सर्वोद्वहमिति ।

उत्तरे चोत्तराभिमुखस्त्रिविक्रमः श्यामाभश्चतुर्भुजः शङ्खचक्रधरः पीताम्बरधरो हारादिभूषितस्सुस्थितवामपादो ललाटान्तोद्धृतदक्षिणपाद उद्धृतपादे प्रसारितदक्षिणहस्तः कट्यवलम्बितवामहस्तस्त्रिविक्रमस्त्रिविक्रमं त्रिलोकेशं सर्वाधारं वैकुण्ठमिति ।

ऐशान्यां प्राङ्मुखो रक्ताभश्श्यामाम्बरधरः कनकाश्यामाभ्यां सहितस्सर्वविद्येश्वरस्सर्वविद्येश्वरं पुण्यं शुद्धं ज्ञानमिति ।

पुरुषादीनामनुक्तं सर्वं विष्णोरिवेति विज्ञायते ।

तृतीयावरणदेवाः ।

तृतीयावरणे प्राच्यां श्यामाभोऽन्तर्मुखो जपाम्बरधरो ज्येष्ठजो द्विभुजो धृतकुलिशदक्षिणहस्तः कट्यवलम्बितवामहस्तः किरीटाद्या-

भरणान्वितो मेघनादरवो वेणुध्वजो गजवाहनश्शचीपतिर्जकारबीज इन्द्रं शचीपतिं पुरुहूतं पुरन्दरमिति ।

आग्नेय्यां वह्निजातः किंशुकपुष्पसदृशश्शक्तिपाणिः कुण्डलाङ्गदहारश्शुकपिञ्छाम्बरधरः कपिध्वजोऽजवाहनस्स्वाहास्वधापतिरकारबीजस्सर्वदेवमुख आसीनोऽग्निरग्निं जातवेदसं पावकं हुताशनमिति ।

याम्ये श्यामाभो रक्तवस्त्रधरो गदी व्यालध्वजो महिषवाहनो भरणीजो यकारबीजश्शुकाङ्गीशो घण्टानादरवो यमो यमं धर्मराजं प्रेतेशं मध्यस्थमिति ।

नैर्ऋत्यां नीलाभो रक्ताम्बरश्शूली भौमिकाख्येभवाहनः* कृकलासध्वजो मूलजस्संमोहिनीपतिः पकारबीजः पर्णरवो† निर्ऋति-[र*]म्भाधिपतिर्नीलं निर्ऋतिं सर्वरक्षोऽधिपतिमिति ।

वारुण्यां नीलवर्णो रक्तवस्त्रधरः पाशी सिंहध्वजो वारुणजस्सुप्रतीकेभवाहनो‡ऽञ्जनापतिर्वकारबीजो दर्दुररवो वरुणो वरुणं प्रचेतसं रक्ताम्बरधरं यादस्पतिमिति ।

---

* 'भौतिकाख्यो नरवाहन' इति पाठान्तरम् । ध्यानमुक्तावल्यामस्य श्री भौतिकेभवहनत्वमुक्तम् † 'फणरव' इति पाठान्तरम् । ध्यानमुक्तावल्यां पणववाक्त्वमुक्तम् । ‡ 'सुप्रतीको मकरवाहन' इति पाठान्तरम् ।

परिवारदेवताः ।

वायव्ये कनकाभस्सितास्बरधरो मृगवाहनो वायुजो* वेणु-ध्वजः कुमुद्वतीपतिर्दण्डभृद्यकाराक्षरबीजश्शङ्करवो वायुर्जवनं भूतात्मकं वायुमुदानमिति ।

उत्तरे सितवर्णः श्यामाम्बरधरो दण्डी पुष्पकवाहनः कृकलास-ध्वजः ककारबीजो यवनलापतिर्धनिष्ठजो मृदङ्गरवः कुबेरः कुबेरं धन्यं पौलस्त्यं यक्षराजमिति ।

ऐशान्यां पाटलाभस्सितास्बरो वृषध्वजवाहनो जटामौलिश्चतु-र्भुजस्त्रिनेत्रश्शूलपाणिश्शकारबीज आर्द्राजः पार्वतीशो डमरुकध्वनि-रीशान ईशानमीश्वरं देवं भवमिति ।

इन्द्रादयोऽष्टावभ्यन्तरमुखाः । एतेष्वनिरुद्धं त्रिविक्रमं वामनं च विना ध्रुवे स्थिते स्थितानासीने त्वासीनाञ्छयने यानके च तत्तत्कौतुकवद् ध्यायन्नर्चयेत् ।

देव्यौ ।

देवस्य दक्षिणे रुक्माभा क्षौमाम्बरधरा पद्महस्ता द्विभुजा कक्ष्याबन्धघनस्तनी ललाटोपरि पुष्पचूडान्विता मकुटहारादिसर्वाभरण-संयुक्ता श्रीवत्सादिबीजोत्तरफाल्गुनीजा मणिध्वनिरवा श्रीः श्रियं धृतिं पवित्रीं प्रमोदायिनीमिति ।

---

* स्वातीसंजनितत्वं ध्यानमुक्तावल्यामुक्तम् ।

परिवारदेवताः ।

वामे श्यामाभा रक्ताम्बरधरा रक्तोत्पलधरा मकुटादिसर्वाभरण-संयुक्ता वैशाखरेवतीजा लक्ष्मीपूर्वाक्षराधिपा शङ्खरवा भूर्हरिणीं पौष्णीं क्षोणीं महीमिति ।

पुरुषा(द्या)दिदेवीनां श्रीभूम्योरि[वे*]ति विज्ञायते ।

कर्मार्चास्थानदेवाः ।

कर्मार्चास्थाने पीठोपरि प्राच्यां प्राङ्मुखस्सुभद्रः पूर्ववत् ।

आग्नेय्यां प्राङ्मुखस्स्वर्णवर्णः पीताम्बरस्सकलाविश्वाभ्यां युक्त-स्सर्वस्सर्वं विश्वं सर्वाधारं सर्वेशमिति ।

दक्षिणे दक्षिणामुखो हयात्मकः श्वेताभः पीतवासा हयानन इलाविश्वाभ्यां सहितो हयात्मकं देवेशं सर्वानन्दं सनातनमिति ।

नैर्ऋत्यां पश्चिमाभिमुखस्सितवर्णश्श्यामाम्बरधरश्शुद्धाविमलाभ्यां युक्तस्सुखावहस्सुखावहं सुमुखं सुरेशं सुरप्रियमिति ।

पश्चिमे पश्चिमाभिमुखो रामदेवः कनकाभो नीलाम्बरधर-श्चक्रशङ्खपरशुधरो ब्राह्मीविजयाभ्यां सहितो रामदेवो रामदेवं महाबलं महाभद्रं परशुपाणिनमिति ।

वायव्ये पश्चिमाभिमुखः किंशुकपुष्पाभस्सिताम्बरधरस्सुभ-गासुमुखीभ्यां युक्तस्संवहस्संवहं सर्वतेजोमयमानन्दं सर्वरूपिणमिति ।

उत्तरे चोत्तराभिमुखः पुण्यः पूर्ववत् ।

ऐशान्यां प्राङ्मुखोऽग्निवर्णस्सिताम्बरधरस्सुमताजननीभ्यां युक्तस्सुवहस्सुवहं सुकृतं विज्ञानं देवमयमिति ।

सुभद्रादीनामनुक्तं विष्णोरिवेति विज्ञायते ।

द्वितीयावरणे गजवाहनः श्वेताभस्स्रुवध्वजो मित्रेशो मित्रः, रुरुवाहनोऽग्निवर्णो जुह्वध्वजस्सतीशोऽत्रिः, गजवाहनः कनकाभस्सवारिकलशध्वजश्शुभेश्वरश्शिवः, हयवाहनः प्रवालाभो वेदध्वजश्शुद्धेशो विश्वः, सर्वे रक्ताम्बरधरा भेरीरवा रोहिणीजाता नामाद्यक्षरबीजाश्चैतान्पीठान्ते प्रागादिबहिर्मुखानर्चयेत् ।

हेमाभस्सनातनः कुन्ताभस्सनन्तनो गुञ्जाभस्सनत्कुमारस्स्फटिक[भ*]स्सनकश्च, सर्वे श्यामाम्बरधराः पद्मवाहनाः कूर्चध्वजा ब्रह्मचारिणो नामाद्यक्षरबीजाः पुष्पजाश्शङ्खरवाश्च । एतानाग्नेयादिषु कोणेषु बहिर्मुखानर्चयेत् ।

मित्रं लोकहितं विश्वात्मकं कविवरं, अत्रिं त्रिधागतिं तृतीयात्मकं वेदमूर्तिं, शिवं मुनिवरं शुद्धं सुखोत्तरं, विश्वं भूतनायकं जगद्वीक्षणं सर्वमातृकं, सनातनं मुनीन्द्रं ब्रह्मसम्भवं निष्ठानकं, सनन्तनं गुरुं सर्वपूज्यं मन्त्रज्ञं, सनत्कुमारं ज्योतिरीशं निरुद्वेगमक्रोधं, सनकं नियन्तारं धर्मज्ञं धर्मवेदितमिति ।

परिवारदेवताः ।

तृतीयावरणे चेन्द्रादीन्पूर्ववत् ।

दक्षिणे श्रियं वामे हरिणीं च पूर्ववत् ।

दक्षिणे भित्तिपार्श्वे रुक्माभो हंसवाहनः कमण्डलुध्वजोऽभि-जिज्जातस्सावित्रीपतिरुकारबीजो वेदरवो ब्रह्माणं प्रजापतिं पितामहं हिरण्यगर्भमिति । सुवर्णाभो ब्रह्मचारी रक्ताम्बरधरः पद्मवाहनः कूर्चध्वजश्शङ्खरवो रोहिणीसहितो मकारबीजो मार्कण्डेयं पुण्यं पुराणममितमिति ।

वामे भित्तिपार्श्वे श्वेताभो व्याघ्रचर्माम्बरधरः परशुमृगधर-श्चतुर्भुजो वृषध्वजवाहनो डमरुकध्वनिर्मकारबीज आर्द्रोज उमापतिर्गङ्गाधरो गङ्गाधरं वृषभवाहनमष्टमूर्तिमुमापतिमिति । अग्निवर्णश्शुक्लाम्बर-धरः पद्मवाहनः कमण्डलुध्वजो रोहिणीजश्शङ्खरवो नामाद्यक्षरबीजः ख्यातीशः पद्मापितरं धातृनाथं ख्यातीशं भुगुमिति ।

द्वारदेवाः ।

दक्षिणे गन्धर्वस्थाने वेणुवर्णाभः पुष्पकेतुस्सन्धिनीश उदङ्मुखो धाता । वामे गन्धर्वस्थाने शुकपत्राभो गजवाहनस्सर्पध्वज ऊर्ध्वेशो दक्षिणामुखो विधाता । द्वारे दक्षिणशिरा उत्तरपाद ऊर्ध्वमुखो नील-वर्णो वृषभवाहनोऽग्निकेतुः प्रीतीशो भृतिः । पूजकादिभिरर्चनाकाला-

दन्यत्र न लङ्घ्यः । उपरि शिरस्स्थाने पूजयेत् । तदुपरि शुक्लाभस्तु-रङ्गवाहनोऽश्वकेतुर्भरणीज उदक्छिरा अधोमुखः पतङ्गः । द्वारदक्षिण-भागे स्वर्णाभो गजवाहनो वृषध्वजो बलेशः पतिरः । वामे सुवर्णाभो रथवाहनश्शङ्खध्वजो धरणीशो वरुणः । एते नामाद्यक्षरबीजाश्शङ्खरवा आश्वयुजादिहस्तजाश्च (?) । धातारं डम्भिनं सनिलं गदावहं, विधातारं कीनाशम्मुरण्डं न्यन्नं, भृतिं भुवङ्गमुत्सङ्गं पीठं, पतङ्गमुत्करमपदानं कपर्दिनं, पतिरं बलिदं मध्यगं वङ्गुरं, वरुणं तेजिनं दंसिनमिति षडेतान्कपाटं यत्रास्ति तत्रार्चयेत् ।

विमानपालाः ।

आलयस्य बहिःपार्श्वे प्राग्द्वारमध्ये प्राङ्मुखो दूर्वाङ्कुरवर्णो हेमाम्बरधरः प्रज्ञतीशो दण्डपाणिश्श्येनध्वजवाहनो रोहिणीजो नामा-द्यक्षरबीजो न्यक्षं दधीत्यकं पीवरमार्यकमिति ।

दक्षिणे दक्षिणाभिमुखो रक्तवर्णस्सिताम्बरधर उत्सायिनीपति-र्दण्डधरो भिण्डिपालध्वजो हयवाहनो मघोद्भवस्स्रुवध्वानिर्विश्वाद्य[क्षर*] बीजो विवस्वान्विवस्वन्तं भरतं विश्वकर्माणं मरीचिमन्तमिति।

पश्चिमे पश्चिमामुखश्शरकाण्डध्वनिः पुष्पाम्बरधरः कपोत-वाहनो धूमकेतुर्हलायुधो बहुप्रजानाथो विशाखजो मेघरवो नामा-द्यक्षरबीजो मित्रो मित्रमित्वरं राजिष्मन्तं रमणकमिति ।

परिवारदेवताः ।

उत्तरे चोत्तराभिमुखो हेमाभः पुष्पाम्बरधरो मृगवाहनो महिषध्वजो मूलजो दण्डपाणिर्वाणीपतिर्वेदरवः क्षत्ता क्षत्तारं महीधरं उर्वरोहं शेवधिमिति ।

द्वारपालाः ।

प्रथमद्वारदक्षिणे श्वेतवर्णश्शुक्लाम्बरधरस्स्रुवध्वजो गजवाहनो रोहिणीजस्सन्ध्यानाथश्शङ्खरवो यन्त्रिकायुधो मकारबीजो मणिको मणिकं महाबलं विमलं द्वारपालकमिति ।

वामे तस्य पत्नी कनकाभा सिताम्बरधरा पुष्पहस्ता सौम्यजा शुकस्वररवा सकारबीजा सन्ध्या सन्ध्यां प्रभावतीं ज्योतीरूपां दृढव्रतामिति ।

मुखमण्डपद्वारदक्षिणे स्फटिकाभो हेमाम्बरो रुरुवाहनः कुशध्वजो विधिजो दिव्येशो नामाद्यक्षरबीजो दण्डपाणिश्चतुर्भुजो वेदरवो विखनसो (?) विखनसं तपोयुक्तं सिद्धिदं सर्वदर्शनमिति ।

वामे रुरुवाहनः कूर्चध्वजस्तारादयक्षरबीजस्सन्धिनीशो वेदरवो दण्डधरो द्विभुजः पुष्यसम्भवस्तापसस्तापसं सन्धिराजं सर्वदोषविवर्जितं सहस्राश्वमेधिनमिति ।

प्रथमावरणद्वारदक्षिणेऽग्निवर्णश्शुक्लाम्बरधरः कूर्मवाहनश्शरध्वजस्सम्मोहिनीपतिर्नामाद्यक्षरबीजः प्रोष्ठपाज्जातो दण्डपाणिस्सिंहरवः किष्किन्धः किष्किन्धं बहुमर्दनं बहुसेनं दृढव्रतमिति ।

वामे श्वेताभो रक्ताम्बरधरः कूर्मवाहनश्शरध्वजो विशोकापतिर्वेणुदण्डायुधस्तीर्थाद्यक्षरबीज आर्द्राजो मेघरवस्तीर्थस्तीर्थमुद्वाहकं सर्वयोग्यमुदावहमिति ।

द्वितीयावरणे द्वारदक्षिणे चोत्तराभिमुखः प्रवालाभ एकदन्तः कण्ठादूर्ध्वं गजाकारो वामनः कुशध्वजो वेणुकङ्कतवाहनश्शङ्खरवश्चतुर्भुजः पाशहेतिः कदलीफलहस्त आर्द्रापतिः श्रविष्ठजो वक्रतुण्डो वक्रतुण्डेमकदंष्ट्रं विकटं विनायकमिति ।

उत्तरे शङ्खवर्णो नीलाम्बरः किरीटी सिंहासने समासीनो द्विभुजो जवनपति*स्सर्पध्वजो हस्ततालरवश्शेषाद्यक्षरबीजो मकरध्वज वाहनो नवभिस्सप्तभिः पञ्चभिर्वा पृष्ठोद्गतैः फणैस्समाच्छादितमौलिर्नागराजो नागराजं सहस्रशीर्षमनन्तं शेषमिति ।

तृतीयद्वारदक्षिणे शङ्खाभो नीलाम्बरो भूताकारश्शुद्धापतिः-पद्मध्वजवाहनो हस्ताभ्यां शङ्खं दधानो वारुणश्शङ्खरवश्शङ्खादिबीजः शङ्खनिधिश्शङ्खनिधिवरं धनदं मौक्तिकोद्भवमिति ।

वामे रक्ताभो जपाम्बरधरो विशुद्धेशो हस्ताभ्यां पद्मं दधानः पद्मध्वजवाहनः प्रोष्ठपाज्जातस्सिंहनादरवः पद्माद्यक्षरबीजः पद्मनिधिः पद्मनिधिं रक्ताङ्गं भूतनायकमिति ।

---

*जरवतीपतिरिति पाठान्तरम्। जनीपतिरिति ध्यानमुक्तावल्यामुक्तम् ।

चतुर्थावरणे द्वारदक्षिणे रक्ताभः श्वेताम्बरधरो नागचूडिकमस्तक उद्देश्यकरो व्याघ्रवाहनस्सर्पध्वजो भामिनीशस्तुरङ्गवाहनोऽहिध्वजो भेरीरवस्तुकारबीजो हस्तजस्तुर्हणस्तुर्हणं† दैत्यराजं विष्णुभक्तं गदाधरमिति ।

वामे श्यामाभो रक्ताम्बरधरो नागचूडिकमस्तक उद्देश्यकरस्सुधापतिर्व्याघ्रवाहनस्सर्पध्वजो झल्लरीरवो हस्तजो बल्यादिबीजो बलिदो दैतेयं महीवीर्यं बलिदं शूलपाणिनमिति ।

पञ्चमावरणद्वारदक्षिणे रक्ताभो नीलाम्बरधरश्शिरसि खड्गधरो वायुवाहनोऽनलध्वजो घोररवस्स्वातिजो बलेशः खकारबीजो नन्दको नन्दकं खड्गं पापहरं दैत्यनाशनमिति ।

वामे पञ्चवर्णैर्युक्तं श्वेताम्बरं नपुंसकं शिरसि चापधरं मेघवाहनं शरध्वजं महानादरवं विशाखजं शकारबीजं शार्ङ्गं शार्ङ्गं धनुर्वरं शत्रुहन्तारं वरायुधमिति ।

षष्ठावरणद्वारदक्षिणे श्वेताभो नीलवासाश्शिरसि शङ्खभृद्दण्डायुधो नन्देशो रोहिणीजो वियद्गतिध्वजो हंसवाहनः कर्णशब्दरवो नामाद्यक्षरबीजश्शङ्खचूडी शङ्खचूडिनं वृक्षदण्डं श्वेताभं घोररूपिणमिति ।

---

† 'तुहिनस्तुहिन'मिति पाठान्तरम् ।

परिवारदेवताः ।

वामे रक्ताभः श्वेताम्बरधरश्शिरसि चक्रभृद्दण्डपाशभृन्मेघनाद-रवो धूमकेतुस्तुष्टीशः प्रवृत्तवाहनश्चकारबीजश्चक्रचूडी चक्रचूडिनं महानादमुदग्ररूपं भयानकमिति ।

सप्तमावरणे द्वारदक्षिणे हेमाभो रक्तवस्त्रधरश्चतुर्भुज उद्देश्य-दण्डधरो दक्षिणहस्ते अपसव्यकट्यवलम्बितवामहस्त उग्रवेगसमन्वितो दंष्ट्राभ्यां युक्तः किंचिद् द्वारं समीक्ष्य स्थितः प्रियापतिर्सिंहवाहनो मेघरवो धूमकेतुर्मूलोद्भवो नामाद्यक्षरबीजश्चण्डश्चण्डमुग्रं भयानकं द्वारपालकमिति ।

वामे श्यामाभः श्वेताम्बरधरस्सुमुखीपतिरन्यत्सर्वं चण्डवत्, प्रचण्डः प्रचण्डं भीमं घोररूपं द्वाराधिपतिमिति ।

विष्वक्सेनः ।

उदक्प्राकारपार्श्वे विमानपार्श्वे वा कुबेरेशानयोर्मध्ये दक्षिणामु-खस्सिंहासने समासीनोऽग्निवर्णः पीतवासाश्चतुर्भुजश्शङ्खचक्रधरोऽभय-कट्यवलम्बितहस्तः श्रीवत्सं ब्रह्मसूत्रं विना हरिरिव भूषणैर्युक्तोऽथवा द्विभुजः पुष्पपाणिश्शक्तिदण्डभृद्वा जयापतिः शृङ्गकेतुः पुष्परथवाहनः पूर्वाषाढोद्भवः पुष्परवो विद्यादिबीजो विष्वक्सेनो विष्वक्सेनं शान्तं हरमिति ।

परिवारदेवताः ।

आलयाभिमुखदेवाः ।

प्रथमावरणस्य त्रिभागाद् द्विभागे सोपानमध्ये वा श्वेताभो रक्ताम्बरधरो बहिर्मुखो ब्रह्मचारी दण्डायुधस्सिंहध्वजवाहनः फाल्गुन-हरिणीजातः कुम्भशब्दरवो भूताद्यक्षरबीजः श्रीभूतः श्रीभूतं श्वेतवर्णं वैष्णवं मुखपालिनमिति ।

द्वितीयावरणे हाटकाभश्शुकपिञ्छाम्बरधरो झल्लरीमेखला-युक्तः किङ्किणीजालयुतस्सर्वाभरणभूषित उपर्युपरिच्छन्नाभिर्बन्धूकनि-भाभिश्शूडाभिस्तिसृभिर्युक्तश्श्यामलस्त्रिशीर्षस्सुमुखभुजगेन कृतच्छन्न-वीरः किरीटवान्पञ्चवर्णमिश्रितभुजगाभ्यां युक्तश्छन्दोमयपक्षद्वययुतो गुञ्जाभनेत्रो हृदयेऽञ्जलिसंयुक्तोऽभयदो वा द्विभुजस्स्वात्युद्भवश्शूडाध्वजो विशोकेशो वायुवाहनस्तुण्डायुधः पक्षाघातरवो गणाद्यक्षरबीजो गरुडो गरुडं पक्षिराजं सुपर्णं खगाधिपतिमिति ।

तत्पूर्वे चक्रोऽङ्गारवर्णो रक्ताम्बरश्शिरासि चक्रभृत्पुष्टिकेशो धूमकेतुः प्रवृत्तवाहनस्तर्जनीरवश्चकारबीजोऽनलस्सुदर्शनं चक्रं सहस्र-विकचमनपायिनमिति ।

तत्पूर्वे पाञ्चजन्यो दुग्धाभो रक्तवस्त्रधरो भूताकृतिश्शिरासि शङ्खभृद्वियद्गतिध्वजो वियद्गात्रायुधो हंसवाहनः कर्णशब्दरवो वारु-

णीपतिश्शकारबीजोऽनलजश्शङ्खः पाञ्चजन्यं शङ्खमम्बुजं विष्णुप्रियमिति ।

तत्पूर्वे हाटकाभश्शुकपिञ्छाम्बर ऊर्ध्वकेशश्शङ्खकेतुर्वायुवाहनस्सिंहरवस्स्वार्ताजातो जकारबीजो जयप्रियापतिर्द्विभुजः पद्मधर आसने दक्षिणं पादं प्रसार्य वाममाकुञ्च्यासीनस्सर्पयुक्तो हृदयेऽञ्जलिसंयुक्तो ध्वजो जयमत्युच्छ्रितं धन्यं ध्वजमिति ।

तत्पूर्वे यूथाधिपस्य पीठे बहिर्मुखः श्वेताभो रक्तवस्त्रधरो भूताकारो द्विभुजो दण्डधरो भूतकेतुर्महाचातकवाहनो विरजेशो गतिशब्दरवः श्रविष्ठजो भूताद्यक्षरो महाभूतो यूथाधिपतिं नित्यमुग्रं महाभूतमिति ।

तत्पूर्वे पीठे पाकोर्जुनो रुक्माभः पद्मनेत्रः कृष्णकुञ्चितमूर्ध्वजो भूताकारः कृष्णवस्त्रधरः कुम्भोदरो द्विभुजो दण्डहस्तोऽश्विनीजातस्सिंहनादरवस्सिंहध्वजवाहनो भूताद्यक्षरबीजस्सुमुखीपतिर्विष्णुभूतः पाकोर्जुनं पाशहस्तमक्षहन्तं (?) विष्णुभूतमिति ।

एतेऽनपायिन एतेषु श्रीभूतगरुडौ प्रासादपार्श्वे चक्रशङ्खध्वजयूथाधिपपाकोर्जुनान्बलिपीठपार्श्वे संयोज्यार्चयेदिति केचित् ।

प्रथमावरणे द्वितीये वा पूर्ववदिन्द्रादीनर्चयेत् । प्रागादिद्वारदक्षिणपार्श्वे तत्तद्दिगीशानभ्यर्चयेत् ।

परिवारदेवताः ।

द्वितीयावरणदेवान्तरालवर्तिदेवाः ।

द्वितीयावरणे प्राग्द्वारादुत्तरे पश्चिमाभिमुखो रक्तवर्णश्शुक्लाम्बरो द्विभुजः पद्महस्तस्सप्ताश्ववाहनो हयध्वजो रेणुकासुवर्चलापतिः खकार-बीजोऽब्धिघोषरवस्सहस्रकिरणो मण्डलावृतमौलिः श्रावणे मासि हस्तज आदित्य आदित्यं भास्करं सूर्यं मार्तण्डं विवस्वन्तमिति ।

दिगीशस्य दक्षिणे पश्चिमाभिमुखः श्वेताभो रक्ताम्बरो द्विभुज इषुचापभृन्मण्डलावृतमौलिर्हिरण्मयाष्टाश्ववाहनः कुलीरध्वजो हंसरवो रोहिणीपतिस्सकारबीजश्चन्द्रो वसिष्ठं सोमं यज्ञाङ्गमिन्दुं चन्द्रमिति ।

दक्षिणे दिगीशस्य पूर्वे चोत्तराभिमुखो बन्धूकवर्णो नीलाम्बर-धरश्शक्तिपाणिश्शरभध्वजश्शुकंबुषापतिरश्विनीजातोऽश्ववाहनश्शङ्करवो नामाद्यक्षरबीजोऽङ्गारकोऽङ्गारकं वक्रं रक्तं धरासुतमिति ।

तस्य पश्चिमे चोत्तराभिमुखः श्यामवर्णो रक्ताम्बरो द्विभुजो रथवाहनस्सिंहध्वजश्शङ्करवो नामाद्यक्षरबीजस्सुशीलापतिः श्रविष्ठजो बुधो बुधं श्यामं सौम्यं श्रविष्ठजमिति ।

पश्चिमे दिगीशस्य दक्षिणे प्राङ्मुखः पीताभश्श्यामाम्बरधरो दर्भहस्तः पूरिमकुटः कृष्णाजिनधरः कुशध्वजो हंसवाहनस्तिष्य-जातस्तारापतिर्नामाद्यक्षरबीजो बृहस्पतिः पीतवर्णं गुरुं तैष्यं बृहस्पति-मिति ।

परिवारदेवताः ।

तस्योत्तरे प्राङ्मुखो रजतवर्णो वल्कलाम्बरोऽजिनजटाधरो मेषवाहनस्स्रुवध्वजो रोहिणीजो नामाद्यक्षरबीजस्सुमदापतिश्शङ्ख-रवश्शुक्रश्शुक्रं भार्गवं काव्यं परिसर्पणमिति ।

उत्तरे दिगीशस्य पश्चिमे दक्षिणामुखोऽब्जनाभो द्विभुजः कुशचीराम्बरधरो रेवतीजः कुमुदापतिर्वराहध्वजवाहनश्शङ्खरवो नामाद्यक्षरबीजो मन्दस्सूर्यपुत्रं मन्दं रेवत्यं शनैश्चरमिति ।

तत्प्राच्यां दक्षिणामुखः श्यामाभो जपाम्बरधरो द्विभुजो नाग-चूडिकमस्तकः पाशायुधो मण्डलावृतमौलिस्सर्पध्वजवाहन आश्लेषजो जरापतिर्नामाद्यक्षरबीजो राहूराहुं दैतेयमुरगेशं ग्राहकमिति ।

प्राच्यां पश्चिमाभिमुखो धूम्रवर्णः श्वेताम्बरधरो नागेशोऽ-न्यत्सर्वं राहोरिव केतुं कृष्णं रौद्रं प्रकाशिनमिति । यद्दिग्द्वारं तद्दिग्द्वारपार्श्वे समर्चयेत् ।

तृतीयावरणदेवाः ।

तृतीयावरणे प्राच्यां प्राग्द्वाराद्दक्षिणे पश्चिमाभिमुखी द्विभुज पीताम्बरा श्वेताभा कृष्णकुञ्चितमूर्धजा हृदयेऽञ्जलिसंयुक्ता रेवतीजाता गकारबीजा कूर्मध्वजवाहना शङ्खरवा गङ्गा गङ्गां नलिनीं जाह्नवीं लोकपावनीमिति ।

परिवारदेवताः ।

दक्षिणे चोत्तराभिमुखा श्यामवर्णा रक्तवस्त्रधरा पीनस्तना कृष्णकुञ्चितमूर्धजा द्विभुजा पुष्पहस्ता परपुष्टरवा मत्स्यवाहनकेतुका मूलजा नामाद्यक्षरबीजा यमुना यमुनां स्फाटिकां नदीवरां पावनीमिति ।

पश्चिमे प्राङ्मुखा रक्ताभा श्वेतवस्त्रा सुखासीना द्विभुजा पुष्पमालाधरा कूर्मध्वजवाहना जलजकुक्कुटरवाश्विनीजाता नामाद्यक्षरबीजा [नर्मदा*] नर्मदां नदीरूपां विद्युद्रूपां विशालामिति ।

उत्तरे दक्षिणामुखा कृष्णश्वेताभा पुष्पवस्त्रधरा पद्महस्ता द्विभुजोद्बद्धकेशी पौष्णजा जलघोषरवा मकरध्वजवाहना सिता-[द्य*] क्षरबीजा सिन्धुस्सिन्धुं नदीवरां मृद्वङ्गीं साधनामिति ।

प्राग्द्वारोत्तरे श्यामवर्णा पीताम्बराष्टभुजा चतुर्भुजा वा शङ्खचक्रधरा सर्वाभरणसंयुक्ता कक्ष्याबन्धवनस्तनी कृत्तिकोद्भवा घण्टारवा नामाद्यक्षरबीजा सिंहध्वजवाहना दुर्गा दुर्गां कात्यायनीं विन्ध्यवासिनीमिति ।

आग्नेय्यां रक्तवर्णा श्वेतवस्त्रा चतुर्भुजा दक्षिणवामयोरक्षमालाकमण्डलुज्ञानमुद्रापुस्तकहस्ता हंसवाहना नामाद्यक्षरबीजाश्विनीजाता प्रणवध्वनिस्सिद्धिस्सिद्धिं विश्वां भृगुपत्नीं सरस्वतीमिति ।

नैर्ऋत्यां श्रियं पूर्ववत् ।

वायव्यां रक्ताभा पुष्पाम्बरा पीनस्तना पुष्पनिधिभाजनधरा दक्षिणे पीतगदाधरा वृषभयुता वामे रक्तनीलपरिताङ्गी (?) मञ्जलिकायुक्ता* ज्येष्ठानक्षत्रजाता खरयुक्तरथवाहना काकध्वजा काकध्वनियुता नामाद्यक्षरबीजा ज्येष्ठा, भूः ज्येष्ठायनीं भुवः ज्येष्ठायनीं सुवः ज्येष्ठायनीं कलिराजनीं (?) कलिपत्नीमिति ।

ऐशान्यां रक्ताभा श्यामाम्बरधरोग्रनयना महारौद्री दंष्ट्राभ्यामलङ्कृता बालमौल्युत्तरासङ्गा मांसार्द्रत्रिशूला षड्भुजा भ्रूभङ्गविकटा कपालपाशहस्ता रक्तकुञ्चितमूर्धजाट्टहाससहितोग्रपीठसमासीना डमुरुकध्वनियुता नामाद्यक्षरबीजा पिशाचध्वजवाहनार्द्रानक्षत्रजाता धात्रीं महोदरीं रौद्रिं महाकालीमिति ।

अन्तराले प्राच्यां पश्चिमाभिमुखा रक्तवर्णा जपाम्बरधरा पुष्पहस्ता ललाटे पुष्पचूडा कृष्णकुञ्चितमूर्धजा वीणावेणुरवा स्वात्युद्भवा कपोतध्वजवाहना सुराद्यक्षरबीजा सुरा सुरां सुमुखीं विद्युद्रूपां सुभगामिति ।

तद्दक्षिणे पश्चिमाभिमुखी कनकाभा सिताम्बरधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा वीणावेणुरवा स्वात्युद्भवा हंसध्वजवाहना

---

* मञ्जुलकुचयुक्तेति पाठान्तरम् ।

नामाद्यक्षरबीजा शेषं सुरावत्, सुन्दरी सुन्दरीं विशालां पद्माक्षीं पद्मवर्णिनीमिति।

दक्षिणे चोत्तराभिमुखा रुक्माभा रक्तवस्त्रधरा पुष्पहस्ता कृष्ण-कुञ्चितमूर्धजा हंसध्वजवाहना हंसरवा विशाखजाता नामाद्यक्षरबीजा स्वाहा स्वाहां शुभाङ्गीं मृदङ्गीं साधनामिति ।

तत्पश्चिमे चोत्तराभिमुखा सितश्यामा कृष्णाम्बरधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा शुकध्वजवाहना नामाद्यक्षरबीजाग्निरवा याम्यजा स्वधा स्वधां समृद्धिं कुलवर्धनीं सन्नतिमिति ।

पश्चिमे प्राङ्मुखा कनकाभा सिताम्बरधरा पुष्पहस्ता द्विभुजा ललाटोपरि पुष्पचूडान्विता मयूरवाहना मयूरस्वररवा सौम्यजा नामा-द्यक्षरबीजा माया मायां मातङ्गीं वराङ्गीं वराननामिति ।

तदुत्तरे प्राङ्मुखा कनकाभा शुक्लाम्बरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा वीणावेणुरवा हंसध्वजवाहना मूलोद्भवा नामाद्यक्षर-बीजा संह्लादिनी संह्लादिनीं वरारोहां मायाङ्गीं मदवर्धनीमिति ।

उत्तरे दक्षिणामुखा हेममिश्रासिताभा रक्ताम्बरधरा पद्महस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा शुकस्वररवा हंसध्वजवाहना राकाद्यक्षरबी-जाभिजिज्जाता राकाराकां मुख्यां रक्ताङ्गीं वराननामिति।

परिवारदेवताः ।

तत्पूर्वे दक्षिणामुखा सितश्यामा शमीपुष्पनिभाम्बरधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा घनस्तनी पृथुश्रोणी हंसध्वजवाहना शुकस्वररवाभिजिज्जाता पुण्याद्यक्षरबीजा [सिनावाली*] सिनीवालीं गर्भास्तिनीं हितदां पुण्यदामिति ।

हवीरक्षकादयः ।

पचनालये चोत्तरामुखः कृष्णवर्णः श्वेताम्बरो विकटश्शूलपाणिः कुशेशयायताक्षो नामाद्यक्षरबीजस्सुरगणेशः शङ्करवोऽश्ववाहनस्सिंहध्वजो रोहिणीजो हवीरक्षको हवीरक्षकमाग्नेयं शैलूषं पचनमिति ।

पुष्पसंचयस्थाने पश्चिममुखः कनकवर्णश्श्यामाम्बरो गजवाहनः पुष्पध्वजो रेवतीजश्शङ्करवश्शुद्धाङ्गीशो नामाद्यक्षरबीजः पुष्परक्षकः पुष्परक्षकं हरितमधिवासं फुल्लमिति ।

स्नानोदकसंचयस्थाने पुरुषं पूर्ववत् ।

प्लोतवस्त्रोत्तरीयादिसंचयस्थाने हेमाभश्शुकपिञ्छाम्बरधरश्चतुर्भुजः कलशाक्षमालापाणिर्जटाधरो हंसवाहनो रूपाद्यक्षरबीजस्सावित्रीपतिरभिजिज्जातः कमण्डलुध्वजो हुङ्काररवस्त्वष्टा त्वष्टारं रूपजातं निधिजं प्लोताधिपतिमिति ।

परिवारदेवताः ।

शयनस्थाने पश्चिमाभिमुखा हेमाभा रक्ताम्बरा पद्महस्ता द्विभुजा शिरसि गदाधरा सिंहध्वजवाहना घोररवा श्रविष्ठजा गकारबीजा गदा गदां कौमोदकीं पुण्यां प्रबलामिति ।

हविर्द्रव्यादिसंचयस्थाने पश्चिमाभिमुखो मेघवर्णः श्वेताम्बरो विकटो दण्डपाणिर्भूतवाहनश्शूलध्वजो नामाद्यक्षरबीजः कुम्भशब्दरवस्सर्वेश आर्द्रानक्षत्रजातश्चामुण्डस्सर्वेश्वरं जगन्नाथं चामुण्डं सर्वतश्वरमिति ।

होमस्थाने पश्चिमाभिमुखः श्यामवर्णः पीताम्बरो द्विभुजो दण्डायुधो रथवाहनस्सिंहध्वजो नामाद्यक्षरबीजश्शङ्खरवः श्रविष्ठजात-स्सुमनसापतिर्बलिरक्षको बलिरक्षकं दण्डधरं सर्वज्ञं सममिति ।

चतुर्थावरणदेवाः ।

चतुर्थावरणे प्राग्द्वारोत्तरे खड्गसंकाशः पीतवासा दण्डपाणिः खड्गध्वजो* रथवाहनस्सत्यलोचनापतिः श्रवणजो नामाद्यक्षरबीजो नादरवो गविष्ठो गविष्ठं त्रैष्टुभं गुह्यमाकाशमिति ।

द्वारस्य दक्षिणे पूर्ववद्धरिणीम् ।

पश्चिमे प्राङ्मुख उत्पलाभश्शुकपिञ्छाम्बरधरः पाशभृद्गज-वाहनस्सिंहध्वजो वकारबीजो वरुणजो दर्दुरशब्दः कनकाधिपस्तोयः पवित्रममृतं तोयं गह्वरमिति ।

---

* ध्यानमुक्तावल्यां खगध्वजत्वमुक्तम् ।

दक्षिणे चोत्तराभिमुखः पिङ्गलाभो नीलवासाश्शक्तिभृद्गज-वाहनः कपिध्वजस्सङ्खपातिश्शङ्खरवो नामाद्यक्षरबीजोऽग्निर्वातिहोत्र-मामुरन्यं शुद्धमाग्निमिति ।

उत्तरे दक्षिणामुखः श्यामवर्णः पीतवासा असिपाणिर्गज-वाहनो रेणुध्वजो यकारबीजश्चलिकापतिस्स्वातीजश्शङ्खरवो वायुरसुं समीरणं वायुं पृषदश्वमिति ।

आग्नेय्यां पश्चिमाभिमुखस्स्फटिकाभो रक्ताम्बरो द्विभुजः पुष्प-हस्तष्षड्तुध्वजवाहनो विघ्नेश ऋताद्यक्षरबीजो याम्यज ऋग्वेद ऋग्वेदं मधुं सोमं क्रतुमिति ।

नैर्ऋत्यां प्राङ्मुखः पीतवर्णः श्वेताम्बरः कुलिशहस्तो द्विभुजः कांस्यतालरवोऽग्निकेतुर्बुद्धीशस्तुरङ्गवाहन * इध्माद्यक्षरबीजः† पुनर्व-सूजातो यजुर्वेदो यजुर्वेदं दधिमिश्रमिष्टमिति ।

वायव्यां प्राङ्मुखो रक्ताभः पीतवासा द्विभुजस्सप्तस्वरध्वजोऽ-जवाहनो मूलोद्भवो मतीशो गानरवस्सामाद्यक्षरबीजस्सामवेदस्सामं घृतं वज्रं यज्ञमिति ।

---

* स्वरवाहन इति पाठान्तरम् । † ध्यानमुक्तावल्यां यकारबीज-त्वमुक्तम् ।

ऐशान्यां पश्चिमाभिमुखोऽब्जनाभः श्वेतवस्त्रो द्विभुजः कूर्च-हस्तस्स्रुवध्वजो हंसवाहनो हंसरवः कलेशः प्रोष्ठपाज्जातो जपाद्यक्षर-बीजोऽथर्ववेदोऽथर्वणं पवित्रं क्षीरं पुण्यमिति ।

अन्तराले प्राच्यामुत्तरे शिवं पूर्ववत् ।

तद्दक्षिणे पश्चिमाभिमुखस्सुवर्णवर्णः शुकपिञ्छाम्बरधरः श्री-पतिर्जयकेतुः खड्गवाहन*श्चतुर्भुजश्शङ्खचक्रधरः पाञ्जजन्यरवः† श्रवणो-द्भवो जाताद्यक्षरबीजो विष्णुर्विष्णुं व्यापिनं रक्तं विश्वमिति ।

दक्षिणे चोत्तराभिमुखः कृष्णवर्णः पुष्पवस्त्रधरो वेणुदण्डधरो द्विभुजश्शङ्खरवस्त्रिपादवाहनः कमण्डलुध्वजो विश्वाद्यक्षरबीजो हस्तजः क्षमेशः काश्यपः काश्यपं विश्वमूर्तिमक्षतं तक्षकमिति ।

तत्पश्चिमे चोत्तराभिमुखः पालाशपुष्पाभो द्विषड्भुजश्षण्मुख-स्सर्वाभरणभूषितो बालमौलियुतो देवयानीपतिर्नामाद्यक्षरबीजश्शङ्खरवो मयूरध्वजवाहनो गुहो जगद्भुवं विश्वभुवं रुद्रभुवं ब्रह्मभुवं भुवर्भुव-मिति ।

पश्चिमे दक्षिणभागे प्राङ्मुखश्श्यामवर्णस्सिताम्बरो द्विभुजः खड्गखेटकसंयुक्तः किरीटी भूतध्वजवाहनो नन्दितापतिरुत्तरोद्भवो

---

* खड्गध्वजवाहन इति पाठान्तरम् । परं तु खगध्वजवाहन इति स्यात् ।

† ध्यानमुक्तावल्यामस्य पञ्चशब्दध्वनित्वमुक्तम् ।

वराद्यक्षरबीजो वंशरवः पङ्क्तीशः पङ्क्तीशं मित्रं वरदं भूर्तृनायक-मिति ।

तदुत्तरे प्राङ्मुखोऽजनाभः श्वेताम्बरधरो नपुंसको वृषवाहनो गळकाध्वज उग्ररव ऊर्म्यायुधस्सौम्यजः पराद्यक्षरबीजः पवित्रः पवित्रममृतं जप्यं शुद्धमिति ।

उत्तरे दक्षिणामुखः पिङ्गलाभः श्यामाम्बरोऽन्यत्सर्वं पवित्रवत् पावनस्सर्वतीर्थं जलं पुण्यं पावनं पुष्यपूजितमिति ।

तत्पूर्वे दक्षिणामुखः श्यामवर्णो हेमाम्बरधरः पञ्चसप्तफणयुतो जरापतिर्हस्तालरव आश्लेषजो मकरध्वजवाहनो नामाद्यक्षरबीजस्त-क्षकस्तक्षकं सर्पराजं क्षितिजं धराधरमिति ।

पञ्चमावरणदेवाः ।

पञ्चमावरणे पूर्वद्वारोत्तरे पश्चिमाभिमुखा श्यामाभा पुष्पवस्त्रा पद्महस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा शुकस्वररवा खड्गध्वजवाहना नामाद्यक्षरबीजा कुहूर्मेदिनीं कुहूं सुदंष्ट्रां क्षमामिति ।

दक्षिणे पश्चिमाभिमुखा सितश्यामा जपाम्बरधरा पुष्पहस्ता द्विभुजा खड्गध्वजवाहना शुकस्वररवा तताद्यक्षरबीजाभिजिज्ञातानुम-ति*रनुमतिं सुरूपां तन्वङ्गीं सुभगामिति ।

---

* अनुमितिरिति पाठान्तरम् ।

दक्षिणे चोत्तराभिमुखा ब्रह्माणी चतुर्मुखी रुक्मवर्णा रक्तवस्त्रा कलशाक्षमालायुता, सरित्प्रिया श्वेतवर्णा कृष्णाम्बरधरा त्रिनेत्रा शूलपाणिः, वैशाखिनी रक्तवर्णा श्वेताम्बरा षण्मुखी शक्तिपाणिः, वैष्णवी श्यामलाङ्गी पीताम्बरधरा शङ्खचक्रधरा, वाराही कृष्णश्यामनिभा रक्तवस्त्रा शस्त्रपाणिः, इन्द्राणी श्यामाभा रक्ताम्बरा वज्रपाणिः, काली श्यामाभा रक्ताम्बरा सुदंष्ट्रा शूलपाशकपालिनी चैता एकप्रासादे समासीना नामाद्यक्षरबीजाः पिशाचध्वजवाहना आर्द्रोद्भवा गणध्वनियुतास्सप्तमातरः ।

ब्रह्माणीं पिङ्गलीं गौरीं सर्वतोमुखीं, सरित्प्रियां विश्वरूपामुग्रां गणेश्वरीं, वैशाखिनीं खण्डिनीं गायत्रीं षण्मुखीं, विश्वगर्भां विषोर्मिणीं कृष्णां रोहिणीं, वाराहीं वरदामुर्वीं वज्रदंष्ट्रीं, जयन्तीं कौशिकीमिन्द्राणीं घनाघनीं, कालीं नालीकदंष्ट्रीं विषहां वेदधारिणीमिति ।

पश्चिमे प्राङ्मुखातिरक्ता शुकपत्रनिभाम्बरा जया, हाटकाभा शुकपत्रनिभाम्बरा विजया, हरिताङ्गी रक्तवस्त्रा विन्दा, कनकाभा श्वेतवस्त्रा पुष्टिका, केतकीपुष्पसंकाशा क्षपत्रनिभाम्बरधरा नन्दका, कुमुदाभा सस्यश्यामनिभाम्बरा कुमुद्वती, चोत्पलनिभा नीलाम्बरधरोत्पलका, अशोकपुष्पनिभा शुकपत्रनिभाम्बरा विशोका चैताः पद्महस्ताः द्विभुजाः कृष्णकुञ्चितमूर्धजा वीणावेणुरवाश्शुकध्वजवाहना नामाद्यक्षरबीजा धनिष्ठजा जयाद्याः ।

परिवारदेवताः ।

जयां सुखप्रदां समृद्धिनीं भद्रां, विजयां विशोकां पुण्यां कामनन्दां, विन्दां लाभां प्रमत्तामजेयां, पुष्टिकां मोहवतीं पुण्यां प्रमत्तां, नन्दकां मधुजननीं सुमुक्तां सुभगां, कुमद्वतीं सुवहां सुसंभारां निवृत्तिम्, उत्पलकां सुगन्धिनीं सर्वमोदां सर्वात्मकां, विशोकां धनराशिमक्षतामिमामिति ।

उत्तरे दक्षिणामुखास्सर्वा मरकतप्रभाः पुष्पाम्बरधराः पुष्पहस्ता द्विभुजाः कृष्णकुञ्चितमूर्धजा मयूरध्वजवाहना मृदङ्गशब्दरवा रोहिणीजाता नामाद्यक्षरबीजास्सप्तरोहिण्यः ।

कूठिनीं नन्दिनीं धरित्रीं रजतप्रियां, ग्रन्थिनीं वेगिनीं प्रजयां प्रवाहिणीं, कृच्छ्रिणीं शाखिनीं वाहिनीं योक्त्रिणीं, कुण्ठिनीं जारिणीं छर्दिनीं प्रवाहिनीं, विकारिणीं दामिनीं वैसिनीं विद्युतां, दर्द्रणीमिन्दुकरां सौमनसीं प्रविद्युताम्, इन्द्रियविकारिणीमर्वतीं गङ्गावाणीं सृजन्तीमिति ।

आग्नेय्यां पद्मपत्रनिभाः पुष्पाम्बरा द्विभुजा दण्डहस्ताश्शशध्वजवाहनाश्शङ्खरवास्स्वार्तीजाता नित्यादिबीजास्सुगुणानामीश्वरा वत्सरा वत्सरान्वससुतान्निधीन्धर्मसूनुकानिति ।

नैर्ऋत्यां कनकाभास्सिताम्बरा द्विभुजा असिधराः प्लवङ्गवाहनाश्शङ्खध्वजा हंसरवास्स्वात्युद्भवा यकारबीजा दायिनीश्वराः प्राणादयः, प्राणमपानं व्यानमुदानं समानमिति ।

वायव्यां धूमाभास्सिताम्बरा द्विभुजा असिधराः प्लवङ्गवाहना-श्शङ्खध्वजा हंसरवा उददायिशाश्शकारबीजा* मरुतो लोकधरान् सप्तसप्तगणान्मरुत्वतीसुतानिति ।

ऐशान्यां.....श्वेताभा व्याघ्रचर्माम्बराः पिङ्गलनेत्रा-श्शकारबीजाश्चान्यत्सर्वं रुद्रवत् । शतरुद्रानोषधीशांस्त्र्यम्बकान्कपाल-वनित† इति ।

दक्षिणेऽन्तराले पश्चिमाभिमुखा.....भास्करवद् द्वाद-शादित्याः, धातारमर्यमणम् [अंशं*] मित्रं [वरुणं*] भगमिन्द्रं विव-स्वन्तं पूषणं पर्जन्यं त्वष्टारं विष्णुं (जघन्यम्) इति ।

उत्तरे पश्चिमाभिमुखाः (पद्मकिञ्जल्कसदृशाः पुष्प).....वर्णाः व्याघ्रचर्माम्बरा नीलग्रीवास्त्रिनेत्राश्चान्यत्सर्वं रुद्रवत् । एकादश-रुद्राश्च अजैकपाद (?) हिर्बुध्न्यं पिनाकिनं पराजितं मृगव्याधकं शर्वं निर्ऋतिमीश्वरं कपालिनं स्थाणुमिति ।

दक्षिणे चोत्तराभिमुखा द्रंष्ट्रामुखा द्विभुजाः पाशहस्तास्सिंह-नादरवा गजवाहना गकार(द्यक्षर)बीजा देव्योकतायुक्ताः‡ स्सौम्यनक्ष-त्रजाता [गन्धर्वाः*] गन्धर्वान्रम्यान्स्वरजान्सोमजानिति ।

---

* एषामुदयनीसनाथत्वं यकारबीजत्वं च ध्यानमुक्तावल्यां कथितम् ।
† ध्यानमुक्तावल्यां कपालपाणित्वमुक्तम् । ‡ ध्यानमुक्तावल्यामेषां रेफबीजत्वं रक्तासक्तत्वं चोक्तम् ।

परिवारदेवताः ।

तत्पश्चिमे चोत्तराभिमुखाः कनकाभा जटाधराः कुशाम्बराः कुशकृष्णाजिनधरा अनूराधाजा जलघोषरवास्तपोऽधिपास्तपाद्यक्षर-बीजा मुनयो मुनींस्तपोऽधिपान्कृशान्पापविनाशनानिति ।

पश्चिमे प्राङ्मुखा हेमाभाः पुष्पाम्बराः पद्महस्ता द्विभुजाः कृष्णकुञ्चितमूर्धजाश्शुकस्वररवाः हंसध्वजवाहना अमृताद्यक्षरबीजा उत्तराजा अप्सरसोऽमृतजा भोगवहास्सरोजा इति ।

तदुत्तरे प्राङ्मुखौ गोक्षीराभावशोकपुष्पवस्त्रौ पुष्पहस्तौ द्विभुजौ मयूरवाहनौ काकपक्षध्वजौ ज्येष्ठानक्षत्रजातौ हंसरवौ सुन्दरे-शावश्वाद्यक्षरबीजावश्विनावश्विनौ यमजौ युग्मौ त्वाष्ट्रीपुत्राविति ।

उत्तरे दक्षिणामुखाः पद्माभाः पुष्पवस्त्रधराः पद्महस्ता द्वि-भुजाश्शङ्खध्वजवाहनास्स्वात्युद्भवाः प्रियाणामीशा वकारबीजाश्शङ्करवा वसवः, धरं ध्रुवं सोममापमनलमनिलं प्रत्यूषं प्रभासमिति ।

तत्पूर्वे दक्षिणामुखाश्श्यामाभा रक्तवस्त्रा दंष्ट्रामुखा रक्तकेशा गदाधरा द्विभुजा डमरुकधरा महिषध्वजवाहना मेघरवा विद्याधरीणा-मीशा मन्त्रादिबीजा विद्याधरान्मन्त्रबलान्पुष्पजान्भोगजानिति ।

षष्ठावरणदेवाः ।

षष्ठावरणपूर्वद्वारोत्तरे रक्ताभः श्वेताम्बरो जटाधरो द्वि-भुजो वीणाहस्तो नागरवस्संगीतापतिर्वायुवाहनः स्रुवध्वजोऽभिजि-

ज्ञातो नामाद्यक्षरबीजस्तुम्बुरुस्तुम्बुरुं मुनिवरं स्वरेशं वेदरूपिण-मिति ।

तद्दक्षिणे पश्चिमाभिमुखः श्वेताभो रक्ताम्बरधरो जटाधरो द्विभुजो वीणाहस्तस्तालरवस्स्वरेशो [वायु*] वाहनः कूर्चध्वजोऽभिजि-ज्ञातो नामाद्यक्षरबीजो नारदो नारदं मुनिवरं गानरूपं ब्रह्मसंभव-मिति ।

दक्षिणे चोत्तरामुखा अब्जाभाः श्वेतवस्त्राः पुष्पहस्ता द्विभुजाः पुष्परथवाहना विद्युद्ध्वजा मेघरवाः श्वेतकृष्णापतयो मूलोद्भवा गका-रबीजाष्षड्ऋतव ऋतून् फलराशीन्पुष्पगन्धांस्तीर्थानिति ।

पश्चिमे प्राङ्मुखः श्वेताभः प्रजापतिरेकवक्त्र एष एव विशेषोऽन्यत्सर्वं विरिञ्चवत्, प्रजापतिः प्रजापतिं स्रष्टारं वेदमयं ह्यरूपिणमिति ।

उत्तरे दक्षिणामुखः श्वेताभो रक्ताम्बरो जटाधरः कूर्मवाहनः कुशध्वजो वेदरवस्सुगणेशो नामाद्यक्षरबीजः श्रवणजो मुद्गलो मुद्गलं मुनिवरं शुद्धं सर्वज्ञमिति ।

आग्नेय्यां श्वेताभो नीलाम्बरो द्विभुजो हलधरः पद्मवाहनः पुष्पकेतुर्नामाद्यक्षरबीजो मायापतिर्मैत्रजो हंसरवो हलेशो हलेशं महा-हलं मायाङ्गं वरदायिनमिति ।

नैर्ऋत्यां हेमाभो रक्ताम्बरो द्विभुजः पुष्पहस्तो मेघध्वजवाहनो नारदो (?) यकारबीजो यक्षपतिर्मूलजातो यक्षो यक्षं सर्ववरदं सुखिनं देवयोनिमिति ।

वायव्यां श्यामाभो रक्ताम्बरो जटाधरो द्विभुजो बालमौलिसमायुक्तश्च्छन्नवीरसमायुक्तो बालापतिर्मृगध्वजवाहनः पुष्पधरहस्तो (मेघध्वजवाहनो) जकारबीजो मृदङ्गरवो जाम्बवं रूपं दर्शनीयं सुन्दरमिति ।

ऐशान्यां श्यामाभो रक्ताम्बरो द्विभुजश्शूलधरो रक्तकेशो दंष्ट्रामुखो नीलापतिः खरध्वजवाहनो घोररवो मूलजो नामाद्यक्षरबीजो ऽसुरोऽसुरं दैतेयं भयानकं घोररूपिणमिति ।

अन्तराले प्राच्यां पश्चिमाभिमुखं पक्षिपादं पुंस्त्रीरूपोर्ध्वकायं पार्श्वयोः पक्षाभ्यां युक्तं वीणातालहस्तं नामाद्यक्षरबीजं वायुवाहनं नालध्वजं स्वररवं हस्तजं किन्नरामिथुनं तीर्थं सङ्गीतं पक्षिरूपमिति ।

तदाक्षिणे पश्चिमाभिमुखो रक्ताभास्तिताम्बरो जटाधरः पुष्पहस्तो द्विभुजः प्राणेशोऽश्वध्वजवाहनो रोहिणीजश्शङ्खरवः प्रणवाद्यक्षरबीजः प्रह्लादः प्रह्लादं प्रजननं विष्णुभक्तं गदाधरमिति ।

दक्षिणे चोत्तराभिमुखश्श्यामाभो रुक्माम्बरो द्विभुज इक्षुचापपुष्पशरो रतिपतिर्मकरध्वजवाहनः पुनर्वसूजातस्स्वररवो मकारबीजो मदनो मदनं कामं सुन्दरं दिव्यरूपिणमिति ।

परिवारदेवताः ।

तत्पश्चिमे चोत्तराभिमुखा पाटलपुष्पनिभा रक्तवस्त्रधरा पुष्पहस्ता द्विभुजा कृष्णकुञ्चितमूर्धजा ललाटोपरि पुष्पचूडासमन्विता हंसध्वजवाहना शुकस्वररवा स्वात्युद्भवा विद्यादिबीजा विपा विपां विद्युद्रूपां विशालाङ्गीं मेधामिति ।

पश्चिमे प्राङ्मुखा हेमाभा श्यामाम्बरा द्विभुजा पुष्पहस्ता कृष्णकुञ्चितमूर्धजा वेणुरवा शुकध्वजवाहना चित्रानक्षत्रजाता नामाद्यक्षरबीजा व्याजनीं सुभगां सुन्दरीं विशुद्धामिति ।

तदुत्तरे रत्नाभा श्वेताम्बरधरा चान्यत्सर्वं व्याजनीवत्, कामिनी कामिनीं कान्तां शुभाङ्गीं विमलामिति ।

उत्तरे दक्षिणाभिमुखा श्वेताभा कृष्णाम्बरा पुष्पहस्ता द्विभुजा ललाटोपरिपुष्पचूडासमन्विता खगध्वजवाहना हंसरवा हस्तजाता नामाद्यक्षरबीजा चन्द्राभा चन्द्राभां तन्वङ्गीं श्वेतरूपां दृढव्रतामिति ।

तत्पूर्वे दक्षिणाभिमुखश्श्यामाभो रक्ताम्बरो द्विभुजः पद्महस्तस्सर्वाभरणभूषितो गजवाहनः खड्गध्वजस्सुनन्दापतिर्नामाद्यक्षरबीजः शतभिषग्जातस्सुनन्दं सुन्दरं सुरप्रियं शुभाननं सौम्यमिति ।

सप्तमावरणदेवाः ।

सप्तमावरणे पूर्वद्वारोत्तरे ब्रह्माणं, तदक्षिणेऽर्यम्णं पश्चिमाभिमुखं, दक्षिणे दण्डधरमुत्तराभिमुखं, पश्चिमे पाशभृतं प्राङ्मुखम्, उत्तरे

धनदं दक्षिणाभिमुखम्, आग्नेय्यां सवितारं सावित्रं, नैर्ऋत्यां चेन्द्रमिन्द्रजं,* वायव्यां रुद्रं रुद्रजम्,† ऐशान्यामप आपवत्सं चार्चयेत् ।

अन्तराले प्राच्यामुत्तरपार्श्वे ईशं पर्जन्यं जयन्तं महेन्द्रं नागं भूतं यक्षमिति ।

तद्दक्षिणपार्श्वे चादित्यं सत्यकं भृशमन्तरिक्षं दुर्गां घोटकमुखीं धात्रीं वपुषं चेति ।

दक्षिणे पूर्वभागेऽग्निमुष्णांशुं वितथं गृहक्षतं राक्षसं जयं कृष्णं चेति ।

तत्पश्चिमभागे यमं गन्धर्वं भृङ्गराजमृषीन्सुरण्डं शिवं प्राणं चेति ।

पश्चिमे दक्षिणभागे निर्ऋतिं दौवारिकं पुष्पदन्तं कविं शक्रं पुरुहूतमिति ।

तदुत्तरभागे सरित्पतिमसुरं शोषिणं रोगं विद्यां यशसं भद्रमिति ।

उत्तरपश्चिमभागे जवनं नागं मुख्यं भल्लाटं वेदभृतं तापसं सिन्धुषमिति ।

---

* 'इन्द्रराज'मिति पाठान्तरम् । † 'रुद्रराजं' मिति पाठान्तरम् ।

तत्पूर्वभागे सोममर्गलमदितिं सूर्यदेवं विद्यामभितं पाञ्चभौतिकमित्येतान्देवानेकमूर्त्या समर्चयेत् ।

प्राकारबाह्ये महत्पीठं कृत्वात्रानुक्तदेवान्सर्वान्देवानिति समर्चयेत् । एषां च वर्णवाहनादीन्पूर्वोक्ताञ् ज्ञात्वार्चयेत् । अनुक्तास्सर्वेप्याकाशवर्णाः श्वेताम्बराः पुष्पहस्ता द्विभुजाः खगध्वजवाहनाश्शङ्खरवास्तत्तन्नामप्रियायुक्ता नामाद्यक्षरबीजा अभिजिज्जाताश्चैवं ज्ञात्वार्चयेत् । एवं प्रकारेण परिवारैर्युक्तमुत्तमोत्तमं सर्वसंपत्करमत्यन्तदर्शनीयं चक्षुर्मनसोः प्रीतिकरं देवप्रियं च भवेत् । तस्मात्सर्वप्रयत्नेनैतैः प्राकारैः परिवारैश्च युक्तमालयार्चनमाचरेत् । सर्वप्राकाराणामभावे प्रथमावरणे तत्तत्प्राकाराश्रितदेवानर्चयेत् । परिवाराणामभावे द्वितीया(वरणा) दिष्वावरणेषु तत्तत्सूत्रैस्तत्तदावरणस्थान् देवान्संयोज्यार्चयेदिति केचित् । अथवा विभवानुसारेण नवविधपरिवारोक्तमार्गेण परिवारार्चनमाचरेत् ।

इति श्रीवैखानसागमे मरीचिप्रोक्ते विंशः पटलः ॥

THE UTTAMADASATALA MEASURE

APPENDIX B.

MEASUREMENT OF PROPORTION IN IMAGES.

THE UTTAMA-DAŚA-TĀLA MEASURE.

In the Indian measure of length there are two different kinds of units, namely the absolute and the relative. Of these the first is based upon the length of certain natural objects, while the second is obtained from the length of a particular part or limb of the person whose measurement is under consideration. The following table gives the relation between the various quantities used in the absolute system:—

8 *Paramāṇus*	make	1 *Ratharēṇu.*
8 *Ratharēṇu*	,,	1 *Rōmāgra.*
8 *Rōmāgras*	,,	1 *Līkshā.*
8 *Līkshās*	,,	1 *Yuka.*
8 *Yūkas*	,,	1 *Yava.*
8 *Yavas*	,,	1 *Uttama-mānāṅgula.*
7 *Yavas*	,,	1 *Madhyama-mānāṅgula.*
6 *Yavas*	,,	1 *Adhama-mānāṅgula.*

Besides these there are also other larger units of length; they are:—

24 *Aṅgulas* or *Mānāṅgulas*	make 1	*Kishku.*
25 *Mānāṅgulas*	„ 1	*Prājāpatya.*
26 „	„ 1	*Dhanurgraha.*
27 „	„ 1	*Dhanurmushṭi.*
4 *Dhanurmushṭis*	„ 1	*Daṇḍa.*

The measure called *daṇḍa* is employed in ascertaining large lengths like that, for instance, of a street in a village.

In the relative system an *aṅgula* is taken to be the length of the middle digit of the middle finger of either the sculptor or the architect, or of the rich devotee who causes a temple to be built or an image to be set up. The *aṅgula* thus obtained is called a *mātrāṅgula*. Another kind of *aṅgula* is obtained by dividing the whole length of the body of an image into 124, 120 or 116 equal parts; each of these divisions is called a *dēha-labdha-aṅgula* or shortly *dēhāṅgula*. The relative measure is meant to be used in the construction of temples or in the making of images; it is however, employed for the latter purpose more often than for the former. Different names are given to certain lengths representable by two or more *dēhāṅgulas* up to twenty-seven; a knowledge of these is also very necessary for the proper understanding of the descriptions given in

the Sanskrit texts printed in this Appendix. An explanatory list of those names is accordingly given below :—

A distance of *one aṅgula* is called *Murti*, *Indu*, *Viśvambharā*, *Mōksha* and *Ukta*.

A distance of *two aṅgulas* is called *Kalā*, *Gōḷaka*, *Aśvinī*, *Yugma*, *Brāhmaṇa*, *Vihaga*, *Akshi* and *Paksha*,

A distance of *three aṅgulas* is called *Ṛiṇa*, *Agni*, *Rudrāksha*, *Guṇa*, *Kāla*, *Śula*, *Rāma*, *Varga* and *Madhyā*.

A distance of *four aṅgulas* is called *Vēda*, *Pratishṭhā*, *Jāti*, *Varṇa*, *Karṇa* (or karaṇa), *Abjajānana*, *Yuga*, *Turya*, and *Turīya*.

A distance of *five aṅgulas* is called *Vishaya*, *Indriya*, *Bhūta*, *Ishu*, *Supratishṭhā* and *Pṛithvī*.

A distance of *six aṅgulas* is called *Karma*, *Aṅga*, *Rasa*, *Samaya*, *Gāyatrī*, *Kṛittikā*, *Kumārānana*, *Kauśika* and *Ṛitu*.

A distance of *seven aṅgulas*, *Pātāḷa*, the *Munis*, *Dhātus*, *Lōkas*, *Ushṇik*, *Rōhiṇī*, *Dvīpa*, *Aṅga* and *ambhōnidhis*.

A distance of *eight aṅgulas* is called *Lōkapālas*, *Nāgas*, *Uraga*, *Vasus*, *Anushṭup*, and *Gaṇas*.

A distance of *nine aṅgulas* is called *Bṛihatī*, *Gṛihas*, *Randhras*, *Nandas* and *Sutras*.

A distance of *ten aṅgulas*, is called *Dik*, *Prāturbhāvā*, *Nāḍi*, *Paṅkti* and . . .

A distance of *eleven aṅgulas*, is called *Rudras* and *Tṛishṭup*.

A distance of *twelve aṅgulas* is called *Vitasti, Mukha Tāla, Yama, Arka, Rāśi* and *Jagatī.*

A distance of *thirteen aṅgulas* is called *Atijagatī.*

A distance of *fourteen aṅgulas* is called *Manu* and *Śakvarī.*

A distance of *fifteen aṅgulas* is called *Ati-śakvarī* and *Tithi.*

A distance of *sixteen aṅgulas* is called *Kṛiyā, Ashṭi* and *Indu-Kalā.*

A distance of *seventeen aṅgulas* is called *Atyashṭi.*

A distance of *eighteen aṅgulas* is called *Smṛiti* and *Dhṛiti.*

A distance of *nineteen aṅgulas* is called *Atidhṛiti.*

A distance of *twenty aṅgulas* is called *Kṛiti.*

A distance of *twenty-one aṅgulas* is called *Prakṛiti.*

A distance of *twenty-two aṅgulas* is called *Akṛiti.*

A distance of *twenty-three aṅgulas* is called *Vikṛiti.*

A distance of *twenty-four aṅgulas* is called *Saṁskṛiti.*

A distance of *twenty-five aṅgulas* is called *Atikṛiti.*

A distance of *twenty-six aṅgulas* is called *Utkṛiti.*

A distance of *twenty-seven aṅgulas* is called *Nakshatra.*

The measurements described in Sanskrit authorities are altogether of six kinds; and they are respectively called *Māna, Pramāṇa, Unmāna, Parimāṇa, Upamāna* and *Lambamāna.* Of these *Māna* is the measurement of the length of a body; *pramāṇa* is that of its breadth, that is a linear measurement taken at right angles to and in the same plane as the *māna*; measurements taken at

right angles to the plane, in which the *māna* and *pramāṇa* measures have been noted, are called *unmāna*, which obviously means the measure of thickness; *parimāṇa* is the name of the measurement of girths or of the periptery of images; *upamāna* refers to the measurements of inter-spaces, such, for instance, as that between the two feet of an image; and lastly *lambamāna* is the name given to measurements taken along plumb-lines. These six names of the requisite linear measurements have a number of synonyms which it is also very necessary to know for understanding aright the texts given in this Appendix. They are therefore given here below:—

Māna—Āyāma, Āyata, Dīrgha.

Pramāṇa—Vistāra, Tāra, Stṛiti, Viśṛiti, Viśṛitam Vyāsa, Visārita, Vipula, Tata, Vishkambha and *Viśāla.*

Unmāna—Bahaḷa, Ghana, Miti, Utchchhrāya, Tuṅga, Unnata, Udaya, Utsēdha, Uchcha, Nishkrama, Nishkṛiti, Nirgama, Nirgati and *Udgama.*

Parimāṇa—Mārga, Pravēśa, Pariṇāha, Nāha, Vṛiti, Āvṛita and *Nata.*

Upamāna—Nīvra, Vivara and *Antara.*

Lambamāna—Sutra, Lambana, and Unmita.

Besides the smaller unit known as the *dēhāṅgula* there are other larger relative units of length, which are called *Prādēśa, Tāla, Vitasti* and

Gōkarṇa. The distance between the tips of the thumb and the forefinger, when they are stretched out to the utmost, is called a *prādēśa*; that between the tips of the thumb and the middle finger, when they are also so stretched out, is called the *tāla*; that between the tips of the stretched out thumb and ring-finger is known as the *vitasti*; and that between the stretched out thumb and little-finger is called the *gōkarṇa.*

The *Āgamas* prescribe various proportions to the images of the various gods, goddesses and other beings belonging to what may be called the Hindu pantheon: the unit of measurement chosen for stating these proportions is the *tāla.* The different *tāla* measurement prescribed for the various images are given below:—

The *Uttama-daśa-tāla* (of 124 *dēhāṅgulas*) is prescribed for the images of the principal deities-Brahmā, Vishṇu and Śiva.

The *Madhyama-daśa-tāla* (of 120 *dēhāṅgulas*) for those of Śrīdēvī, Bhūmidēvī, Umā, Sarasvatī, Durgā, Sapta-mātṛikās, Ushā and Jyēshṭha.

The *Adhama-daśa-tāla* (of 116 *dēhāṅgulas*) for Indra and the other Lōkapālas, for Chandra and Sūrya, for the twelve Ādityas, the eleven Rudras, the eight Vasus, the two Aśvini-dēvatas, for Bhṛigu and Mārkaṇḍēya, for Garuḍa,

Sēsha, Durgā, Guha or Subramaṇya, for the seven Rishis, for Guru, Ārya, Chaṇḍēsa and Kshētrapālakas.

The *Navārddha-tāla* for Kubēra, for the nine Grahas (planets) and certain other celestial objects.

The *Uttama-nava-tāla* for Daityēśa,* Yakshēśa, Uragēśa, Siddhas, Gandharvas and Chāraṇas, Vidyēśa and for the Ashṭamūrtis of Śiva.

Sa-tryaṅgula-nava-tāla for such persons as are equal to the gods in power, wisdom, sanctity, etc.

Nava-tāla for Rākshasas, Asuras, Yakshas, Apsarases, Astramūrtis, and Marudgaṇas.

Ashṭa-tāla for men.

Sapta-tāla for Vētāḷas and Prētas.†

Shaṭ-tāla for Prētas.

Pañcha-tāla for Kubjas or deformed persons and for Vighnēśvara.

Chatustāla for Vāmanas or Dwarfs and for children.

Tritāla for Bhūtas and Kinnaras.

Dvitāla for Kūshmāṇḍas.

Ēka-tāla for Kabandhas.

The measurements relating to an image of the *Uttama-daśa-tāla* proportion are given in tabular form below; and a figure is also drawn to show clearly how this proportion works out.

---

* These are, according to the Kāraṇāgama, to be made according to the *Uttama-nava-tāla* measure.

† These are, according to the Kāraṇāgama, to be made according to the *Shaṭ-tāla* measure.

In this connection, it would be interesting to note that, according to the canons of European art, a well-proportioned male figure is equal to eight times the length of the head: in other words is *ashṭa-tāla* in height; that of a female figure is seven and a half times that of a head, or *sārdha-saptạ-tāla.* According to European artists the ear is said to extend from a line drawn across the side of the head on a level with the eye brow, and another which is drawn on a level with the wing of the nose: or, in the language of Indian artists between the *bhrū-sūtra* and the *nāsā-puṭa-sūṭra.* Similarily the other rules arrived at by the Indian artist do not appear to be divergent from those evolved by the European artist, and if in Indian sculpture the results are not good in some instances it is the fault of the artist and not attributable to the guide-books. The similarity of the limbs of the body as compared with various natural objects such as for instance, the nose with the sesamum flower and the trunk composed of the chest and abdomen with the face of a cow are very well pointed out with reference to a number of illustrations by Mr. Abanindranath Tagore in his excellent article entitled 'Indian Iconography' contributed to the Modern Review for March 1914.

A figure of Vishṇu drawn in accordance with the Uttama-daśa-tala measure.



[To face page 9, App. B.]

Parts of the Body Measured.	Measurements according to the									
	Śilparatna.		Aṁśumad-bhēdāgama.		Kāraṇāgama.		Kāmikāgama.		Vaikhānasā-gama.	
	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.
Vertical Measurements—(Mana.)										
The height of the *ushṇīsha* ...	1	3	1	3	1	0	1	0	1	3
From the bottom of the *ushṇīsha* to the end of the front hair ...	3	0	3	0	3	0	3	0	3	0
From the end of the front hair to the *akshi-sūtra* ...	4	3	...	...	4	4	4	4	4	3
From the *akshi-sūtra* to the end of the nose	4	3	...	...	4	4	4	4	4	3
From the end of the nose to the end of the chin	4	3	4	3	4	4	4	4	4	3
The small fleshy fold below the chin	0	4	...	...	0	4	0	4	0	4
Height of the neck ...	3	7	...	...	4	0	4	0	3	7
From the *hikkā-sūtra* to the middle of the chest ...	13	3	13	3	13	4	13	4	13	3
From the middle of the chest to the navel	13	3	13	3	13	4	13	4	13	3

Parts of the Body Measured.	Measurements according to the									
	Śilparatna.		Aṁśumad-bhēdāgama.		Kāraṇāgama.		Kāmikāgama.		Vaikhānasā-gama.	
	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.
From the navel to the root of the penis	13	3	13	3	13	0	13	0	13	3
From the root of the penis to the end of the thigh ...	27	0	27	0	27	0	27	0	26	5
The length of the knee ...	4	0	4	0	4	0	4	0	4	3
The length of the foreleg ...	27	0	27	0	27	0	27	0	26	5
The height of the foot (from the ankle to the ground) ...	4	0	4	0	4	0	4	0	4	3
From the tip of the toe to the back of the heel... ...	17	0	17	0	...	...	...	...	17	0
From the bony projection at the ankle to the root of the toe ...	...	...	...	...	9	4	...	...	...	...
The length of the upper arm, from the *hikkā-sūtra* to the elbow	27	0	27	0	27	0	...	...	27	0
The length of the elbow ...	2	0	2	0	2	0	...	...	2	0
The length of the forearm ...	21	0	21	0	21	0	...	...	21	0
The length of the palm of the hand from the wrist to the tip of the middle finger ...	13	4	13	4	13	4	...	...		

Measurement of Widths—(Pramana.)										
The width of the face ...	12	4	12	4	...	...	...	...	14	0
The width of the face at its end (?)	13	4	13	4	...	...	...	...	...	...
The width of the neck at the top	9	4	9	4	8	4	...	...	9	4
The width of the neck at the bottom	10	0	10	0	9	6	...	...	...	...
The width from shoulder to shoulder, immediately below the *hikkā-sūtra*	40 (?)	0	27	0	...	...	...	...	44	0
The distance between the arm-pits	22	4	22	4	24	0	...	...	24	0
The width of the arm where the biceps muscle ends ...	9	4	...	...	9	2	...	...	...	...
The distance between the nipples.	21	0	...	...	...	...	...	...	20	...
The width of the chest, at the place where it ends and the abdomen begins	19	0	19	0	18	4	...	...	...	...
The width at the loin, (*madhya*, the place where the upper portion of the body joins with the lower limbs) ...	3	4 (?)	16	0	...	...	...	...	...	...
The width of the abdomen ...	...	...	...	...	13	4	...	...	16	0
The width of the male-organ ...	1	2	...	...	...	...	...	...	...	...
The width of the hip below the male organ, (*śrōṇidēsam*) ...	20	4	20	4	...	...	...	...	20	0

Parts of the Body Measured.	Measurements according to the							
	Śilparatna.		Amśumad-bhēdāgama.		Kāraṇāgama.		Vaikhānasā-gama.	
	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.	Ang.	Yava.
The width of the thigh at its root ...	...	...	...	...	13	4	13	3
Do. at its middle ...	13	6	14	2	...	...	11	0
Do. at its lower end ...	...	...	...	...	9	4	...	...
The width of the knee	8	6	9	6	8	4	9	4
The width of the portion where the knee ends and the foreleg begins	5	2	...	...	8	1	...	...
The width of the foreleg at its middle ...	6	6	6	6	...	...	7	0
The width of the shaft of the foreleg ...	4	6	4	6	...	...	4	4
The distance between the inner bony projections on the ankles	5	3	5	3	5	0	5	0
The width of the heel	4	4	4	4	...	...	3	4
The height of the heel (from the ankle to the ground)	4	4	4	4	...	...	4	4
The width at the middle of the sole of the foot.	6	2	6	2	5	2	5	4
The breadth of the sole at the toe end ...	7	0	7	0	6	0	...	...
The length of the great toe	4	2	4	2	4	0	4	0
The width of the same	2	1	2	1	6 (?)	0	2	0
The width of the toe-nail	1	½	1	½	1	2	...	...
अथ विमानादिमानविभागार्थमङ्गुलीनां विधिं वक्ष्ये । मानाङ्गुलं मात्राङ्गुलं देहलब्धाङ्गुलमिति त्रिविधं भवति । दिवादित्यरश्मौ जालकान्तःप्रविष्टे तद्गोचरा अत्यन्तं क्षुण्णा लवाः परमाणवः प्रोक्ताः । परमाणुभिरष्टाभीरथरेणुः। रथरेणुनाष्टगुणितं रोमाग्रम्। रोमाग्रादष्टगुणितं लिख्या* । लिख्यादष्टगुणितं यूकम्। यूकादष्टगुणितं यवम्। यवादष्टगुणितं मानाङ्गुलमुत्तमम्। तदष्टांशोनं मध्यमम्। तत्तुरीयांशोनमधमम्। पुरुषस्य दक्षिणहस्तमध्यमाङ्गुलेर्मध्यमपर्वणि विस्तारं (आयतं वा) मात्राङ्गुलम् । बेरोत्सेधं तत्तालवशेन विभज्यैकांशं देहलब्धाङ्गुलं तदष्टांशं यवमिति ।

त्रयाणामङ्गुलानां संज्ञा । मात्रं च मूर्तीन्दुविश्वंभरामोक्षोक्तमित्येकाङ्गुलस्य । कलागोलकाश्विनीयुग्मब्राह्मणाविहगाक्षिपक्षाश्वेति द्व्यङ्गुलस्य । अग्निरुद्राक्षिगुणार्णकालशूलरामवर्गमध्या इति त्र्यङ्गुलस्य । वेदप्रतिष्ठाजातिकराब्जजाननयुगतुर्यतुरीयाणीति चतुरङ्गुलस्य। विषयेन्द्रियभूतेषुसुप्रतिष्ठापृथिव्यश्वेति पञ्चाङ्गुलस्य । कर्माङ्गरससमयगायत्रीकृत्तिकाकुमाराननकौशिकर्तवः षडङ्गुलस्य । पातालमुनिधातवो लोकोष्णिग्रोहिणीद्वीपाङ्गाम्भोनिधयश्चेति सप्ताङ्गुलस्य । लेकपालनागोरगवस्वनुष्टुब् गणाश्चेत्यष्टाङ्गुलस्य । बृहतीग्रहरन्ध्रनन्दसूत्राणि नवाङ्गुलस्य । दिक्प्रादुर्भावनाडीपङ्क्तय इति दशाङ्गुलस्य । त्रिष्टुब्रुद्राश्चेत्य-

* 'लीक्षे'ति पाठान्तरम् ।

कादशाङ्गुलस्य । वितस्तिर्मुखं तालं यमं चार्कोराशिर्जगती चेति द्वादशाङ्गुलस्य। अतिजगती त्रयोदशाङ्गुलस्य। शक्वरी मनुश्चतुर्दशाङ्गुलस्य । अतिशक्वरी तिथिश्चेति पञ्चदशाङ्गुलस्य । क्रियाष्टीन्दुकलाश्चेति षोडशाङ्गुलस्य । अत्यष्टिस्सप्तदशाङ्गुलस्य स्मृतिर्धृतिश्चेत्यष्टदशाङ्गुलस्य । अतिधृतिरेकोनविंशस्य । कृतिर्विंशदङ्गुलस्य । प्रकृतिरेकविंशदङ्गुलस्य। आकृतिर्द्वाविंशतेः । विकृतिस्त्रयोविंशतेः । सत्कृतिश्चतुर्विंशतेः । अतिकृतिः पञ्चविंशतेः । उत्कृतिष्षड्विंशतेः । नक्षत्रं सप्तविंशतेः । इति ।

एवं मानानि भवन्ति । मानं प्रमाणमुन्मानं परिमाणमुपमानं लम्बमानमिति षण्मानानि ।

आयामस्यायतं दीर्घम्मानमित्येकार्थवाचकाः । विस्तारं विस्तृतं तारं विसृतिर्विसृतं व्यासं विसारितं विपुलं ततं विष्कम्भं विशालमिति प्रमाणस्य । बहलं नीत्रं घनमितिच । उच्छ्रायं तुङ्गमुन्नतमुदयमुत्सेधमुच्चमित्युन्मानस्य। निष्क्रमं निष्क्रतिर्निर्गमं निर्गतिरुद्गममिति च । मार्गं प्रवेशनं नतं परिणाहं नाहं वृतिरावृतमिति परिमाणस्य । निवृतं विवरमन्तरमित्युपमानस्य । सूत्रालम्बनान्वितं* यत्तत्तल्लम्बमानमिति । एतैष्षण्मानैर्युतं बेरं कारयेत् ।

---

*'सूत्रं लम्बनमुन्मित'मिति पाठान्तरम् ।

अथ देवानां तालविधानम् । देवस्योत्तमं दशतालम् । तथैव ब्रह्मशङ्करयोः । श्रीभूम्योरुमासरस्वत्योश्च मध्यमं दशतालम् । इन्द्रादिलोकपालानामादित्यचन्द्रयोर्द्वादशादित्यानामेकादशरुद्राणामष्टव - सूनामश्विन्योर्भृगुमार्कण्डेययोर्वीशशेषकयोर्दुर्गागुहसप्तर्षीणामप्यधमं द- शतालम् । यक्षेशनवग्रहाद्यन्यदेवानां नवार्धतालमानेन । दैत्ययक्षोर- गेशसिद्धगन्धर्वचारणानामुत्तमनवतालेन । देवकल्पमनुजानां सत्र्यङ्गुलं नवतालम् । निशाचरेन्द्राणामसुराणां च नवतालम् । मर्त्यानामष्टता- लेन । वेतालानां सप्ततालेन । प्रेतानां षट्तालेन । कुब्जानां पञ्चतालेन । वामनानां चतुस्तालेन । भूतानां किन्नराणां च त्रितालेन कूष्माण्डानां द्वितालेन । कबन्धानामेकतालेन । तेषां प्रत्येकमुत्तम- मध्यमाधमभेदानि भवन्ति । चतुर्विंशच्छताङ्गुलमुत्तमं दशतालम् । सविंशतिशताङ्गुलं मध्यमं दशतालम् । षोडशाधिकशताङ्गुलमधमं दशतालम् ।

अङ्गुष्ठप्रदेशिनीभ्यां मितं प्रादेशं, अङ्गुष्ठमध्यमाभ्यां मितं तालमङ्गुष्ठानामिकाभ्यां मितं वितस्तिरङ्गुष्ठकनिष्ठिकाभ्यां मितं गोकर्णम्। मानाङ्गुलेन चतुर्विंशत्यङ्गुलं किष्कुः, पञ्चविंशत्यङ्गुलं प्राजापत्यं, षड्वि- शत्यङ्गुलं धनुर्ग्रहं, सप्तविंशत्यङ्गुलं धनुर्मुष्टिस्तच्चतुर्गुणो दण्डस्तेन दण्डेन ग्रामादीनां विन्यासं कारयेत् ।

अथातः प्रतिमालक्षणं वक्ष्ये । बेरस्य लम्बमानं पूर्वमेव परीक्ष्य कारयेत् । अष्टषष्टयङ्गुलायतां चतुर्विंशत्यङ्गुलविस्तारां द्व्यङ्गुलघनां लघ्वीं श्लक्ष्णां फलकां गृहीत्वा परितस्त्र्यङ्गुलं नीत्वा मानसूत्रं विन्यस्य प्राक्पश्चिमभागस्थानि सूत्राणि प्रसारयेत् । मध्ये सूत्रं विन्यस्य मध्यसूत्रा देकाङ्गुलं पुटपर्यन्तसूत्रं तदेव दृगन्तरी स्यात् । तस्मात् त्र्यर्धाङ्गुलं नेत्रपर्यन्तं, तस्माद् द्व्यर्धाङ्गुलं मुखपर्यन्तं तस्माद् द्व्यङ्गुलं कर्णपर्यन्तं तस्मात् त्र्यङ्गुलं कक्षपर्यन्तं तस्माद्दशाङ्गुलं बाहुपर्यन्तमेवं त्रयोदश सूत्राणि विन्यस्य परभुजस्य मणिबन्धावसानं मानसूत्रद्वयमेव तत्तारं नीत्वाभ्यन्तरं भवेत् । पुरतो मध्यसूत्रयोगं मध्यसूत्रं, तस्माद् द्व्यङ्गुलं पुटसूत्रं, तस्माद् द्वियवाधिकं द्व्यङ्गुलं नेत्रसूत्रं तदेव वक्त्रबाह्यं, तस्मात् त्र्यङ्गुलमन्तर्भुजावधिकं तदेव कक्षपर्यन्तं, तद्वदेव चतुरङ्गुलं बाहुपर्यन्तं तदेव मध्ये-मध्यं कक्षाभ्यन्तरगतमङ्गपार्श्वमध्यं स्यात् । तस्माद् द्व्यङ्गुलं कर्णपर्यन्तं तस्मात् त्र्यङ्गुलं शिरःपृष्ठावसानकं तदेव परभुजावधि भवतीति । एवं दक्षिणोत्तरगतानि सूत्राणि षट् च विन्यस्य तत्तत्सूत्रसङ्गे सुषिरं कृत्वा तन्तुना यवान्तरमात्राणि सूत्राणि सुषिरे संयोज्याग्रे प्रोतकुण्डलं लोहमयं मृन्मयं वा संबध्य सूत्राणि प्रलम्बयेत् ।

स्थानकस्य मध्यसूत्रं मौलिशिखामणेर्मध्ये मूर्ध्नो भ्रूसङ्गस्य नासाग्रस्य च मध्ये कण्ठस्य हृदयस्य कुक्षेर्नाभेर्योनेःपादयोश्च मध्ये प्रलम्बयेत् । तत्सूत्रसंस्पर्शं नासाग्रं कुक्षिमध्यं च । सूत्रान्मौल्यग्रान्तं षडङ्गुलं,

हनुमध्यं यवाधिकचतुरङ्गुलं, हिक्कान्तं चतुरङ्गुलं, हृन्मध्यं द्वयर्धाङ्गुलं, नाभिष्वङ्यवमेकाङ्गुलं, योनिमूलं द्वयङ्गुलम्, ऊरुमध्यं त्र्यङ्गुलं, जान्वन्तरं षडङ्गुलं, जङ्घान्तरमष्टाङ्गुलं, नलकान्तरं षोडशाङ्गुलम्, (अष्टाङ्गुलं वा?) सूत्रात्पूर्वं सार्धाङ्गुलमङ्गुष्ठाग्रं सूत्रात्परतो द्वयर्धाङ्गुलमेवं मध्यत्रसूत्रवशान्मानयेत्। बाहुपर्यन्तमेव पार्श्वसूत्रं स्यात्। चूडामणौ मूर्ध्नि कर्णपाल्यन्तरे बाहुकूर्परयोः पार्श्वे जानुजङ्घागुल्फानां मध्ये प्रलम्बयेत्। मौलौ मूर्धनि कृकाटिकाककुद्वंशस्फिक्पार्ष्णीनां मध्ये पृष्ठमध्यसूत्रं प्रलम्बयेत्। शिरःपार्श्वे वक्त्रबाह्ये गण्डपार्श्वे चूचुकाग्रमध्ये श्रोणिपार्श्वे चोरुजङ्घयोर्मध्ये वक्त्रबाह्यसूत्रं प्रलम्बयेत्। एतानि षट् च पीठावलम्बान्यन्यानि तत्तदङ्गसंस्पर्शान्येव लम्बयेत्। आसनस्योर्ध्वकायस्य पूर्ववन्मध्यसूत्रादीनि षट् सूत्राणि आसनस्योपरि लम्बयेत्। मध्यसूत्रं जानूपरिष्टात्केशान्तं तन्मध्यगं (बाह्योरुपरिष्टात्केशान्तं तन्मध्यगं जान्वोः पार्श्वाभ्यां बाहुभ्यां च मध्यगं सूत्रं?) प्रलम्बयेत्। सूत्राद्वामजान्वन्तरमूर्ध्वकायसमं दक्षिणजान्वन्तरं तदेव चतुरङ्गुलं त्र्यङ्गुलं यवोनं वान्यत्सर्वं पूर्ववत्कारयेत्।

अथात उपमानं वक्ष्ये। परभुजस्य मणिबन्धान्तरमष्टाङ्गुलमुष्णीषाच्छङ्खचक्रान्तरं मुखं, मध्योदरात्कूर्परान्तरं षडङ्गुलं, अभयहस्तस्य मध्यमाङ्गुलाग्राच्चूचुकान्तरं त्रयोदशाङ्गुलं, स्वागतस्य मध्यान्नाभ्यन्तरं दशाङ्गुलं, वरदस्य मध्याच्छ्रोण्यन्तरं नवाङ्गुलं, वामहस्तस्य

मध्याङ्गुलान्मेढ्रान्तरं षडङ्गुलं, ऊरुमूलान्तरमेकाङ्गुलमूरुमध्यान्तरं द्वयर्धाङ्गुलं, जान्वन्तरं चतुरङ्गुलं, जङ्घयोर्मध्यं पञ्चाङ्गुलं, नलकान्तरं षडङ्गुलम् अक्षयोरन्तरं पञ्चाङ्गुलं, पार्ष्ण्यन्तरं चतुरङ्गुलं, तन्मध्यान्तरं षडङ्गुलम्, अङ्गुष्ठान्तरमष्टाङ्गुलं, शयनस्य तिर्यग्गतब्रह्मसूत्रस्य दक्षिणतो मुखं त्र्यङ्गुलं पादाङ्गुष्ठयोर्मध्यं विंशत्यङ्गुलं, पार्ष्ण्यन्तरं भागं, जान्वोरन्तरं चतुर्दशाङ्गुलं स्यात् । एवमुपमानं च लक्षयेत् ।

इति श्रीवैखानसागमे मरीचिप्रोक्ते द्वाविंशः पटलः ॥

अथ देवेशस्योत्तमदशतालवशान्मानं वक्ष्ये । त्रियवाधिकमेकाङ्गुलमुष्णीषं, केशान्तं त्र्यङ्गुलं, दृक्सूत्रं त्रियवाधिकचतुरङ्गुलं, तत्समं पुटान्तं, तत्समं हन्वन्तं, गलमर्धाङ्गुलं, हिक्का यवोनचतुरङ्गुलं, हिक्काया हृदयान्तं हृदयान्नाभ्यन्तं नाभेर्मेढ्रान्तं क्रमात्त्रियवाधिकत्रयोदशाङ्गुलं, मेढ्रादूर्वायामं त्रियवोनसप्तविंशत्यङ्गुलं, जानु त्रियवाधिकं चतुरङ्गुलं, जङ्घा चोरुसमायामा, पादं सत्रियवचतुरङ्गुलं, पादायामं सप्तदशाङ्गुलं, हिक्कासूत्रादधस्ताद्वाहुदीर्घं सप्तविंशत्यङ्गुलं, कूर्परं द्वयङ्गुलं, प्रकोष्ठमेकविंशत्यङ्गुलं, तलं सप्ताङ्गुलं, तन्मध्यमाङ्गुलायामं षडर्धाङ्गुलं, तर्जनी यवाधिकपञ्चाङ्गुला, अनामिका तद्यवाधिका, अङ्गुष्ठं यवाधिकभागं, कनिष्ठाङ्गुलं तद्यवाधिकं स्यात् ।

अथ प्रमाणं वक्ष्ये । उष्णीषात्पूर्वकेशान्तं नवाङ्गुलं, द्विपार्श्वयोस्तत्समं, पृष्ठकेशान्तं द्वयङ्गुलं, (मुखस्य विस्तारं) चतुर्दशाङ्गुलं मुखं, द्विचत्वारिंशदङ्गुलं नाहं शिरसः, पृष्ठतःकर्णयोरन्तरं त्रयोदशाङ्गुलं, पूर्वतष्षड्विंशत्यङ्गुलं, शेषं कर्णयोस्स्थानं, भ्रुवोर्मध्यमेकाङ्गुलं, केशान्ताद् भ्रुवोर्मध्यं त्र्यङ्गुलं, (अष्टाङ्गुलार्धं तिर्यगुपक्षेपमक्षयामं?) मध्यमष्टार्धाङ्गुलं, ग्रीवाग्रविस्तारं नवार्धाङ्गुलं, ग्रीवामूलविस्तारं बाह्वोः पर्यन्तं चतुश्चत्वारिंशदङ्गुलं, वक्षोविशालं चतुर्विंशत्यङ्गुलं, हृदयविस्तारं विंशत्यङ्गुलं, स्तनयोरन्तरं चतुर्दशाङ्गुलं, (दशाङ्गुलं?) मध्योदरं षोडशाङ्गुलं, श्रोणिविस्तारमष्टादशाङ्गुलं, कटिविस्तारं विंशत्यङ्गुलम्, ऊरुमूलविशालं त्रियवाधिकं त्रयोदशाङ्गुलम्, ऊरुमध्यविस्तारमेकादशाङ्गुलं, जानुविस्तारं नवार्धाङ्गुलं, जङ्घामूलमष्टाङ्गुलं, जङ्घामध्यविस्तारं सप्ताङ्गुलं, नलकाविस्तारं सार्धचतुरङ्गुलम्, अक्षगुल्फान्तं पञ्चाङ्गुलं, पादविस्तारं सार्धपञ्चाङ्गुलं सार्धवेदाङ्गुलोत्सेधं, पार्ष्णिविस्तारं सार्धत्रिमात्रं, (पादाङ्गुलिविस्तारम्)अङ्गुष्ठायामं चतुरङ्गुलं, तर्जनी तद्यवाधिका,तद्यवोनं मध्यमाङ्गुलं, त्रिमात्रार्धानामिका, कनिष्ठिकाङ्गुलायामं त्रिमात्रं, कनिष्ठाद्यङ्गुष्ठान्तं क्रमात्सप्ताष्टार्धनवषोडशभिर्यवैरङ्गुलानां विस्तारं, (शेषं विवरं) बाहुमूलविस्तारं दशाङ्गुलं, बाहुमध्यं नवाङ्गुलं, कूर्परं सार्धसप्ताङ्गुलं, प्रकोष्ठमध्यर्धसप्ताङ्गुलं, मणिबन्धं चतुर्मात्रं, तलं सार्धषण्मात्रं,

रुद्राष्टनवसप्तषड्यवविपुलान्यङ्गुष्ठादिकनिष्ठान्तमङ्गुल्यग्राणि, तद्यवार्धहीनसप्तवेदेषुतुर्याग्नियवमङ्गुष्ठादिनखानां विशालं, द्वियवाधिकमायामं, द्विपर्वाङ्गुष्ठमन्यानि त्रिपर्वाणि, अङ्गुष्ठमूलपर्वार्धाधिकाङ्गुलं, द्वयर्धाङ्गुलमग्रपर्व, तर्जनीमूलपर्व चतुर्दशयवं, मध्यपर्व त्रयोदशयवा, अग्रपर्व द्वादशयवं, मध्यमाङ्गुलिमूलपर्व अष्टादशयवं, मध्यपर्व षोडशयवा, अग्रपर्व सार्धपञ्चदशयवा, अनामिकामूलपर्व सार्धचतुर्दशयवा, मध्यपर्व सार्धत्रयोदशयवा, अग्रपर्व द्वादशयवाः, कनिष्ठाङ्गुलिमूलपर्व द्वादशयवा, मध्यपर्वैकादशयवा, अग्रपर्व दशयवा, अङ्गुलीनामग्रे द्वियवाधिकं नखाग्रं, पार्ष्णिहस्तघनं वेदाङ्गुलं, तन्मध्यघनं द्वयर्धाङ्गुलमग्रमङ्गुलीवत्क्षीणं, शुकोदरघनं द्वयर्धाङ्गुलं, मणिबन्धात्तदायामं सयवं भागं, शुकोदरविशालं द्वियवोनं त्र्यङ्गुलं, पार्ष्णिहस्तविस्तारं द्वियवोनचतुरङ्गुलं, तस्याग्रे तर्जन्यादिकनिष्ठान्तानामङ्गुलीनां मूलतलं मांसलमर्धमात्रेण, शेषं तलं निम्नम्, अङ्गुष्ठतर्जनीमूलयोस्सार्धत्र्यङ्गुलम्, अङ्गुलीनामधोमूलसन्धिरङ्गुलम्, (एकाग्रो वा नीचार्धाङ्गुलं?) कनिष्ठिकादेशमूलात्तर्जनीमूलपार्श्वगा आयूरेखा, मध्यमाङ्गुल्यधो द्वयङ्गुलं, तस्य षड्यवाधस्ताद्विद्यारेखा, तलमूलात्कराग्रान्तं ब्रह्मरेखा, दक्षिणे करतले चक्रशङ्खसमा रेखा भवेत्। उपक्षेपनिम्नं द्वियवम्, अन्तरावर्तं द्वयङ्गुलम्, उपक्षेपविशालमध्यर्धाङ्गुलं, त्रियवोन्नतं हस्तिमस्तकवद्विस्तीर्णमस्तकं सोन्नतमङ्गुलम्(?)।

(भ्रूतलं) भ्रूश्चतुर्यवा सार्धाङ्गुलायामा सार्धैकयवविस्तारानतार्धमात्रान्तर्या वक्रपुच्छका चापवत्। भ्रूलता स्निग्धरोमसंचिता, द्वयङ्गुलं नेत्रतारं, भ्रुवस्थलादर्धाधिकाङ्गुलायामे अक्षिणी, अक्षिमण्डलमूर्ध्वाधोवर्मसंछन्नमूर्ध्ववर्म द्वादशयवमधोवर्म चतुर्यवमेतयोर्योगं नयनसूत्रम्। ऊर्ध्ववर्मविस्तारं द्वियवम्, अक्षिमोचन(?)विस्तारमेकाङ्गुलम्, ऊर्ध्ववर्म द्वादशयवमधोवर्म चतुर्यवमूर्ध्ववर्मणा संस्पृशेत्। षड्यवं कृष्णमण्डलं, तस्योभयोः पार्श्वयोस्तदर्धाधिकायतौ शुक्लभागौ, कनीनिकाविस्तारायामं यवं, नेत्रान्तरक्तं यवार्धं, ज्योतिर्यवप्रमाणं, दृष्टिर्यूकमात्रोर्ध्ववर्मततं द्वियवमधोवर्मततं यवार्धकं, वर्मणो घनमर्धयवं, नवतिः पक्ष्मरोमाणि, शेषं पक्ष्म, नासिकाग्रमध्यमूलान्तं क्रमादष्टादशषड्यवविस्तृतं, नासिकाग्रमङ्गुलविस्तारं, गोजीमूलाग्रं द्वयङ्गुलोच्छ्रयं, पुष्करमष्टयवोत्सेधं, तन्मूलविस्तारं द्वियवं, मध्यविस्तारं द्व्यर्धयवम्, अग्रविशालं त्रियवं, पुटस्रोतोऽङ्गुलं, तिर्यग्यवपञ्चकं पुटस्य बहलं, यवमात्रायतान्वितं निष्पावबीजसदृशं तिलपुष्पसमाकारम्। नासिकापुटसूत्रान्नासाग्रं द्वियवार्धलम्बितं, सार्धचतुर्यवं गोजीतटं द्वियवविस्तारं, द्विवक्रा चोत्तरपाली सार्धयवविस्तृता, त्रियवार्धततं सार्धयववेदाङ्गुलायतमुत्तरोष्ठमास्यतारं तदेव। चत्वारः पुरतो दन्तास्त्रियवायामविस्तृताः, तावन्तोऽधरदन्ता द्वियवार्धतायताः, चतुर्यवायते दंष्ट्रे सदंशमुकुलोपमे ऊर्ध्वे, अधोदंष्ट्रे अर्धयवाधिके, पुरोदन्ताद्यवार्धेनायता-

स्तत्समविस्तारा: पञ्चोपदंष्ट्रा द्विपार्श्वगा द्वात्रिंशद् दन्तसङ्ख्या । अधरोत्तरयोर्दन्तायामसमावन्तस्तदर्धो दन्तरोपणो (?) जिह्वा षडङ्गुलायामार्धविस्तारा, घृतजिह्वाङ्गुलं (बाहु ?) कर्णरन्ध्रं कलाङ्गुलं षडङ्गुलायतं, तालुविस्तीर्णं त्र्यङ्गुलमास्यं नवयवान्तरं द्विगुणायतं षड्यवार्धमुत्सेधं, पालिका रक्ता, भागं ततमायामं द्विगुणम्, ओष्ठावस्ताच्चिबुका सार्धाष्टयवं, हनुस्तत्समं तस्माद्धनुचक्रं सद्वियवं, तदुन्नतं रुद्राक्षियवं, चिबुकं निम्नगं (?) हनोर्गलं गलात्कण्ठमङ्गुलार्धं, गलरेखाध्यर्धकलायामा चापसन्निभा, कर्णबन्धाद्धनोर्मध्यं दशाङ्गुलं, तस्माच्चतुष्कलं सृका, नेत्रादधस्तादपाङ्गनेत्रमङ्गुलम्, अपाङ्गात्कर्णमूलं षडङ्गुलं, कर्णं कलाततं, नेत्रसूत्रसमं कर्णस्रोतः, तत्कर्णतुङ्गतार (?) कर्णनालमूलं कलासार्धयवं, कर्णावर्ती सार्धयवतता, पाली चतुर्यवा, कर्णपिप्पली चतुर्यवविस्तारा द्विगुणायता, पिञ्छूषी द्व्यङ्गुलायामा षड्यवविशाला कर्णावर्ती-पिञ्छूषीचूलिका यवर्तुमनुतुर्ययवार्धविस्तारा:, पिञ्छूषीकर्णचूलिका-कर्णावर्त्युन्नतं चूल्यन्तावदत्यर्धयव मर्धाङ्गुलं (?) कर्णचूलीपिञ्छूषी-कनीनिकायवान्तरं पिप्पलीपाल्योः पाली बालेन्दुसन्निभा यव-निष्पावसदृशा, पिप्पली षड्यवायता चतुर्यवविशाला, स्रोतोऽधो नेत्रसूत्रात्पिञ्छूष्यधः कर्णनालं मात्रार्धघनयुक्तं, नालौ पूर्वापरौ विवरं षड्यवमधोनाहं मात्रं स्यात् । कण्ठमूलादधो वपुः कार्यं,

कृकाटी सार्धाङ्गुलनता तस्यापरं यवं भागं (?) तद् ग्रीवायामं तत्रार्धाङ्गुलं तारं द्वादशाङ्गुलं तं स्कन्धयोस्समे (?) कर्णबन्धादधस्स्कन्धसन्धिस्सार्धषडङ्गुलं, सप्ताङ्गुलौ स्कन्धौ शोभान्वितौ, हिक्कासूत्रात्स्कन्धसन्ध्युचं चतुरङ्गुलं, तन्मध्येऽध्यर्धाङ्गुलं जत्रु बाहुशिरस्सन्धिरंसान्तस्स्कन्धमूलतो नवाङ्गुलं द्वियवं, तस्माद् द्वियवं षडङ्गुलं बाहुशिरो जत्रुसहितं कूर्परांसं पञ्चाङ्गुलायतं त्र्यङ्गुलायतमुत्क्षेपं समौ मुण्डितौ (?) भुजौ समनुन्नं मापयेदेवं नीत्वा भुजं नयेत् । कण्ठाधस्तात्ककुद्वागायताष्टकोलकं(?) ककुदः कटिसन्ध्यन्तं वंशं विंशतिर्नागाधिका तत्समं ककुदोऽधस्तात् षड्भागे कक्षोडरान्तरं(?) कक्षाधस्ताद्बाहुपर्यन्तं द्वियवं नवाङ्गुलं, स्कन्धसन्धेरधस्तादंसपीठं सार्धेन्द्रियाङ्गुलं, तस्माद् द्वियवाङ्गुले अंसफलके स्तनसूत्रसमे, तत्रान्तरयोर्दशाङ्गुलं ककुद्, धर....त्रिमात्रतारं सप्ताङ्गुलं तद्वक्षसो मांसलं तयोस्सन्धिवंशतारं कलानतं वंशपार्श्वे चांसफलकाया अधो नवाङ्गुलं, बृहत्योस्स्तनान्तरं वंशात्सुप्रतिष्ठाकलं तयोर्बृहती स्तनयोर्मध्यं सप्तदशाङ्गुलं घनं बृहत्या कटिसन्ध्यन्तरं मध्यं सप्ताङ्गुलायतं तद्वनं स्याच्चतुर्भागं तदधोऽङ्गुलाधिकं कटि सार्धमुखं सार्धाङ्गुलं खण्डकान्तं खण्डस्य पुरस्तात्पायुर्भागाङ्गुलं सार्धधृतिमात्रं कटिबन्धविशालं जघनख्य बहिःपृष्ठे वंशपार्श्वद्वयोः ककुन्दरं षडर्धाङ्गुलं विशालं निम्नौ ककुन्दरस्यान्तं द्व्यङ्गुलं बिन्दुखण्डकयोस्तिर्यक्कटिर्वेदार्धमात्रिका खण्डं

द्वयङ्गुलं तारं सार्धतुर्याङ्गुलं स्फिगारम्भतारं नवाङ्गुलं सुवृत्तं कण्ठः कम्बुसमो वृत्तो द्विरेखावृतोऽधस्तान्नाडिकाधस्तद्वादशयवं कक्षाया हिक्कान्तं तावत् स्तनं कक्षादष्टाङ्गुलं षडङ्गुलं नम्रमुरः हृद् द्वियवाधिकं हृदयात्स्तनपीठतुङ्गमर्धाङ्गुलं कक्षाधारलम्बमत्युक्तं यवकोलकं स्तनपीठस्योन्नतिः कक्षस्याङ्गुलं तत्पुरस्तान्मुखं विप्राङ्गुलं यवं वृत्तं स्तनं यवोन्नतं स्तनाक्षं द्वियवतारं तदधस्ताद् द्वयङ्गुलं स्तनं हिक्का द्वयङ्गुलं निम्नं जत्रुरेखा द्वयङ्गुलं नाभिर्दक्षिणावर्ता षड्यवनिम्नायतेन्द्रियाङ्गुला नाभिः श्रोणिपार्श्वे त्रिकलाङ्गुलाद् द्वयङ्गुलोर्ध्वकटिश्रोण्याश्शेषं मेढ्रपीठं सार्धपञ्चाङ्गुलं लिङ्गायतं तारं द्विमात्रं मुष्कलम्बं तुर्यार्धाङ्गुलं तत्समविस्तारं वृषाननसदृशं मेढ्रं रुद्राक्षाङ्गुलं प्रतिष्ठाङ्गुलं द्वियवं जानुमण्डलविष्कम्भं घनं द्वयर्धमात्रं पार्श्वबन्धं तुर्याङ्गुलं पृष्ठाज्जानु त्रिमात्रार्धयवविस्तारान्वितं पृष्ठजं कोलकं मध्यभागं शेषं पार्श्वयोरपि जान्वन्तादिन्द्रवस्त्यन्ने (?) तालं मत्स्यवदुन्नतं पृष्ठजङ्घाश्रितं मत्स्यपार्ष्णी द्वयङ्गुलविस्तारं तनुकपृष्ठपार्श्वयोरन्तरं तद्बहिर्गते अक्षगुल्फयोस्तुङ्गं मनुपङ्क्तियवैर्विपुलं क्रमेणाष्टादशद्विविंशतियवं प्रतिष्ठार्धाङ्गुलं पार्ष्णितारं तत्तुङ्गं शराङ्गुलं सार्धं प्रपदतुङ्गमङ्गुष्ठद्वयङ्गुलघनं शेषाणि विस्तारसमतुङ्गान्यष्टयवविस्तारादैर्घ्यानखमुखपार्श्वे द्वयोस्तुर्ययवं नीत्वा नखं नयेत्। चतुरर्धचतुस्सार्धाग्न्यग्नियवैरश्विसार्ध (मध्यर्ध)यवैः क्रमान्नखानां

विस्तारं, तर्जन्यादिकनिष्ठान्तं त्रियवं तदर्धार्धेन नखायतास्तर्जन्यङ्गुष्ठयोरन्तरं चतुर्यवं, पर्वद्वयमङ्गुष्ठमन्यानि त्रिपर्वाणि, स्वतारसदृशमग्रे पर्वान्तं यवाधिकमङ्गुष्ठपर्वमूलाग्रं शेषाङ्गुलीनां द्वियवाधिक्यमेकैकं सर्वाङ्गुलिमूलानां मूलतलं मांसलं पार्ष्णिभागे तलं पञ्चाङ्गुलायामं शेषं वर्तुलं कारयेत् । पादौ द्वौ चक्रशङ्खरेखासमन्वितौ । सर्वं सुव्यक्तं सुसंपूर्णं बेरं सलक्षणं चक्षुर्नन्दनमूर्ध्वकायमधःकायसममेव कृत्वा सर्वत्र विष्कम्भात्त्रिगुणं वृत्तं तत्परिमाणं स्यात् । सर्वेष्वङ्गेषु एकयवादिषड्यवान्तं हीनाधिक्यं न दोषाय भवति । तस्माद्यथोचितं युक्त्या कारयेदित्याह मरीचिः ।

इति श्रीवैखानसागमे मरीचिप्रोक्ते त्रयोविंशः पटलः ॥

प्रतिमालक्षणानि ।

APPENDIX C.

॥ प्रतिमालक्षणानि[1] ॥

विनायकः ।

स्थानकं वासनं वापि पद्मपीठे विशेषतः ।
स्वदन्तं दक्षिणे हस्ते वामहस्ते कपित्थकम् ॥

मोदकं गजहस्ते तु अङ्कुशं दक्षिणे परे ।
वामहस्ते तु पाशं वा नागं वाप्यक्षमालिका ॥

त्रिनेत्रं चतुर्भुजं ह्येवं दुकूलवसनान्वितम् ।
आभङ्गं समभङ्गं वा स्थानके तु प्रकल्पयेत् ॥

आसने त्वासनं चेत्तु वामपादं तु शाययेत् ।
वामेतरेणोरुमूर्ध्नि पादेनोत्कुटिकासनम् ॥

---

१. अत्र मुद्रितानां सर्वेषामपि लक्षणवचनानां तन्त्रशिल्पादिमूलग्रन्थेभ्यस्समुद्धृतत्वात्तेषु भूयिष्ठमपशब्दालिङ्गव्यत्ययादिकमुपलभ्यते । साकल्येन तद्विपरिवर्तनं दुश्शकमित्यर्थावबोधोपरोधकानां परमपशब्दानां साधुस्वरूपमधस्तादुपदर्श्यते ।

ईषद्वक्रतनुर्वामे कर्तव्यन्तु[1] विशेषतः ।
व्यालयज्ञोपवीती च किरीटमकुटान्वितः ॥

सर्वाभरणसंयुक्तो महाकायो महोदरः ।
एवं विनायकं[2] ख्यातं षण्मुखस्य ततश्शृणु ॥

(अंशुमद्भेदागमे ॥)

गजवक्त्रो गणाधीशो भूतरूपो महोदरः ।
नागयज्ञोपवीतस्तु घनपिण्डोरुजानुकः ॥

नीलनीरुहाभस्तु चतुर्दोर्दण्डमण्डितः ।
अवामवामावर्तेभहस्तः पद्मासने स्थितः ॥

स्वदन्तं परशुं कुर्यात्स्वदक्षिणकरद्वये ।
लड्डुकं चाक्षमालां च वामपाणावथोत्पलम् ॥

रक्तवस्त्रधरं वाथ श्यामाभं कनकप्रभम् ।
पीतकञ्चुकसंछन्नं किरीटमकुटोज्वलम् ॥

शुक्लयज्ञोपवीतं च सर्वाभरणभूषितम् ।
स्वं शृङ्गं वाङ्कुशं दक्षे वामे पाशं च लड्डुकम् ॥

स्थानकं[3] वासनं वाथ गणेशं कारयेत्ततः ।
त्रिभिर्विराजितं नेत्रैर्नेत्राभ्यामथवा द्विजाः ! ॥

---

१. 'कर्तव्यस्त्वि'ति भवितव्यम् । २. 'विनायकः ख्यात' इति भवितव्यम् ।
३. तिष्ठन्तमासीनं वेत्यर्थः ।

पद्मस्थं वापि पीठस्थं मूषिकस्थमथापिवा ।
इष्टासनस्थितो वापि प्रभादिपरिमण्डितः ॥
एवं स्यात्केवलो विघ्नराजश्शक्त्यान्वितोऽथवा ।
गणेशो भारतीश्रीभ्यां वामेऽवामे युतोऽथवा ॥
शक्त्यैकया युतो देवो यदि तल्लक्ष्म कथ्यते ।
आसीनमासने रत्नमकुटादिविभूषितम् ॥
श्यामवर्णं तथा शक्तिं धारयन्तं दिगम्बरम् ।
उत्सङ्गे निहितां देवीं सर्वाभरणभूषिताम् ॥
दिगम्बरां सुवदनां भुजद्वयसमन्विताम् ।
विघ्नेश्वरीतिविख्यातां सर्वावयवसुन्दरीम् ॥
पाशहस्तां तथा गुह्यं दक्षिणेन करेण तु ।
स्पृशन्तीं देवमप्येवं चिन्तयेन्मन्त्रनायकम् ॥
चतुर्भुजं त्रिनेत्रं च पाशाङ्कुशधरं विभुम् ।
इक्षुखण्डकरोपेतं वामेन देविगुह्यकम् ॥
स्पृशन्तं पुष्करेणापि खण्डमिक्षोस्तु हे द्विजाः ! ।
एवं संपाद्य तन्मन्त्रैः प्रतिष्ठामारभेद्द्विजाः ! ॥
(उत्तरकामिकागमे पञ्चचत्वारिंशत्तमपटले ॥)

अथातस्संप्रवक्ष्यामि विघ्नेशस्थापनं परम् ।
आदौ त्वहमुमासार्धं[1] क्रीडार्थं हिमवद्वने[2] ॥

---

१. उमया सार्धमित्यर्थः २. आदावित्यर्धस्यासंपूर्णार्थत्वात्तदनन्तरं करेणुश्चेत्यर्धात्पूर्वं चैकेनार्धेन भवितव्यमिति संभाव्यते ।

करेणुश्च गजेन्द्रेण सम्भोगमकरोत्ततः ।
यदृच्छया तु तं दृष्ट्वा तदाकारमगामहम् ॥

[1]करेण्वराकृतं चोमां तदाक्रीडमहं भृशम् ।
तस्यां तु गर्भमदधात्तस्मिन्काले[2] तवो [3]भवेत् ॥

फलं दक्षिणहस्ते तु वामहस्ते स्वशृङ्गकम् ।
पादाङ्कुशोर्द्ध्वहस्ते[4] तु गजहस्ते तु लड्डुकम् ॥

करण्डमकुटं प्रोक्तं सर्वाभरणभूषितम् ।
शिरश्चक्रप्रभां कृत्वा पद्मपीठोपरिस्थितम् ॥

दाडिमीपुष्पसङ्काशं सर्वाभरणभूषितम् ।
आसनं स्थानकं वापि कारयेद्विघ्ननायकम् ॥

(सुप्रभेदागमे त्रिचत्वारिंशत्तमपटले ॥)

विनायकस्य वक्ष्यामि मूर्तिं चित्रोपयोगिनीम् ।
गजवक्त्रं त्रिनेत्रं च चतुर्बाहुं महोदरम् ॥

भग्नैकदन्तसंयुक्तं स्तब्धकर्णं समालिखेत् ।
नागोपवीतिनं कुब्जं पीनस्कन्धाङ्घ्रिपाणिकम् ॥

भग्नदन्तधरं चैकमन्यमुत्पलसंयुतम् ।
दक्षिणे विलिखेद्वामे सकुठारसलस्पृकौ (?) ॥

---

१ 'करेणोराकृतिं चोमा' इति भवितव्यम् । २ 'मदधां तस्मि'न्निति भवितव्यम् । ३. 'तवोद्भव' इति भवितव्यम् । ४. 'पाशाङ्कुशावूर्ध्वहस्ते' इति भवितव्यम् ।

पार्श्वे बुद्धिकुबुद्धिभ्यामधस्तादधुनान्वितम् ।
आसीनमुत्तमे पीठे सिन्धुराननविग्रहम् ॥
(शिल्परत्नसंयोजिते कस्मिंश्चिद् ग्रन्थे ॥)

प्रमथाधिपो गजमुखः प्रलम्बजठरः कुठारधारी स्यात् ।
एकविषाणो बिभ्रन्मूलककन्दं सुनीलदलकन्दम् ॥
(बृहत्संहितायामष्टापञ्चाशत्तमाध्याये ॥)

विनायकस्तु कर्तव्यो गजवक्त्रश्चतुर्भुजः ।
स्थलकं[1] चाक्षमाला च तस्य दक्षिणहस्तयोः ॥
पात्रं चोदकपूर्णं[2] च परशुश्चैव वामतः ।
दन्तश्चास्य न कर्तव्यो वामे रिपुनिषूदन ! ॥
पादपीठकृतः पाद एक आसनगो भवेत् ।
पूर्णे चोदकपात्रे[3] च कराग्रं तस्य कारयेत् ॥
लम्बोदरस्तथा कार्यस्तब्धकर्णश्च यादव ! ।
व्याघ्रचर्माम्बरधरस्सर्पयज्ञोपवीतवान् ॥
(हेमाद्रिव्रतखण्डे विष्णुध० ॥)

दन्तं च परशुं पद्मं मोदकांश्च गजाननः ।
गणेशो मूषकारूढो बिभ्राणस्सर्वकामदः ॥
(रूपमण्डने ॥)

---

१. वाचस्पत्ये विनायकलक्षणप्रदर्शनावसरे 'स्थलकं गजदन्ताकार'मिति विवरणं कृतम् । २ 'मोदकपूर्णं च' इति भवितव्यम् । ३. 'मोदकपात्रे' इति भवितव्यम् ।

बीजगणपतिः ।

रक्तो रक्ताङ्गरागांशुककुसुमयुतस्तुन्दिलश्चन्द्रमौलि-
नेत्रैर्युक्तस्त्रिभिर्वामनकरचरणो बीजपूरात्तनासः ।
हस्ताग्राकृष्टपाशाङ्कुशरदवरदो नागवक्त्रोऽहिभूषो
देवः पद्मासनो वो भवतु नतसुरो भूतये विघ्नराजः ॥

धृतपाशाङ्कुशकल्पलतिकावरदश्च बीजपूरयुतः ।
शशिशकलकलितमौलिस्त्रिलोचनोऽरुणहनुश्च गजवदनः ॥

भासुरभूषणदीप्तो बृहदुदरः पद्मविष्टरो ललितः ।
.....सम्पदे मनुजैः ॥

नमामि पाशाङ्कुशदन्तभक्ष्य-
संलक्षितं त्र्यक्षमुदारकुक्षिम् ।
नागाननं नागकृतोत्तरीय-
मुत्तप्तहेमप्रभमेकदन्तम् ॥
रत्नाक्षमालां परशुं च दन्तं
भक्ष्यं च दोर्भिः परितो दधानम् ।
हेमावदातं त्रिदृशं गजास्यं
लम्बोदरं तं शिरसा नमामि ॥

विघ्नेशं सपरश्वधाक्षपदिकं[1] दन्तोल्लस.....कै-
र्दोर्भिः पाशसृणीस्वदन्तवरदाढ्यैर्वा चतुर्भिर्युतम् ।
शुण्डाग्राहितबीजपूरमुरुकुक्षिं त्रीक्षणं संस्मरेत्
सिन्दूराभमिभास्यमिन्दुशकलाद्याकल्पमब्जासनम् ॥

---

१. अक्षपदकमिति भवितव्यम् । अक्षमालेत्यर्थः ।

हेरम्बः ।

सिंहोपरि स्थितं देवं पञ्चवक्त्रं गजाननम् ।
दशबाहुं त्रिनेत्रंच जाम्बूनदसमप्रभम् ॥
प्रसादाभयदातारं पात्रं पूरितमोदकम् ।
स्वदन्तं सव्यहस्तेन बिभ्रतं चापि सुव्रते ! ॥
...करं चाक्षसूत्रं च परशुं मुद्गरं तथा ।
पाशाङ्कुशकरां शक्तिं देवं लम्बोदरं शुभम् ॥
पीवरं चैकदन्तं च तुम्बुरूणां गणान्वितम् ।
(शिल्परत्ने पञ्चविंशाध्याये ॥)

वरं तथाङ्कुशं दन्तं दक्षिणे च परश्वधः[1] ।
वामे कपालं[2] बाणाक्षपाशं कौमोदकीं तथा ॥
धारयन्तं करैरेभिः पञ्चवक्त्रं त्रिलोचनम् ।
हेरम्बं मूषकारूढं कुर्यात्सर्वार्थकामदम् ॥
(रूपमण्डने ॥)

अभयवरदहस्तं पाशदन्ताक्षमाला-
परशुमथ त्रिशीर्षैर्मुद्गरैर्मोदकं च ।
विदधतुवरसिंह[3] पञ्चमातङ्गवक्त्रः
कनकरुचिरवर्णः पातु हेरम्बनामा ॥
(क्रियाक्रमद्योतौ ॥)

---

१. 'पर्श्वधाभया'विति पाठान्तरम् । २. 'व्यालंचे'ति पाठान्तरम् ।
३. ' विदधदपरसिंहः' इति किमु स्यात् ? ।

वक्रतुण्डः ।

लम्बोदरं त्रिनयनं पाशाङ्कुशधरं परम् ।
वरदाभयहस्तं च लसत्कर्णं सचामरम् ॥

(रूपमण्डने ॥)

बालगणपतिः ।

बालः प्रसूतमात्रोऽयमम्बिकाङ्के निवेशितः ।
अतिरक्तो गजमुखो द्विशदो[1] रत्नभूषितः ॥

चषकं पुष्करे बिभ्रत् सृणिपाशौ करद्वये ।
द्वाभ्यां कल्पलतां दोर्भ्यां दोलयन्रत्नवर्षिणीम् ॥

एवं ध्यात्वा जपेन्मन्त्रं बालाख्यं गणनायकम् ।

(शिल्परत्ने पञ्चविंशाध्याये ॥)

करस्थकदलीचूतपनसेक्षुकपित्थकम् ।
बालसूर्यप्रभाकारं वन्दे बालगणाधिपम् ॥

तरुणगणपतिः ।

पाशाङ्कुशापूपकापित्थजम्बूफलं तिलान्वेणुमपि स्वहस्तैः ।
धत्ते सदायस्तरुणोऽरुणाभः पायात्सयुष्मांस्तरुणो गणेशः ॥

भक्तविघ्नेशः ।

नालिकेराम्रकदलीगुळपायसधारिणम् ।
शरच्छशाङ्कसदृशं भजे भक्तगणाधिपम् ॥

---

१. 'द्विरद' इति स्यात् ।

वीरविघ्नेशः ।

वेतालशक्तिशरकार्मुकखेटखड्ग-
खट्वाङ्गमुद्गरगदाङ्कुशनागपाशान् ।
शूलं च कुन्तपरशुध्वजमुद्वहन्तं
वीरं गणेशमरुणं सततं स्मरामि ॥

शक्तिगणेशः ।

आलिङ्ग्य देवीं हरितां निषण्णां परस्परस्पृष्टकटीनिवेशाम् ।
सन्ध्यारुणं पाशसृणिं वहन्तं भयावहं शक्तिगणेशमीडे ॥

(क्रियाक्रमद्योतौ ॥)

विषाणाङ्कुशावक्षसूत्रं च पाशं
दधानं करैर्मोदकं पुष्करेण ।
स्वपत्न्या युतं हेमभूषाम्बराढ्यं
गणेशं समुद्यद्दिनेशाभमीडे ॥

(श्रीमन्मन्त्रमहार्णवे ॥)

ध्वजगणाधिपः ।

यः पुस्तकाक्षगुणदण्डकमण्डलुश्री-
निर्वर्त्यमानकरभूषणमिन्दुवर्णम् ।
तं घोरमाननचतुर्भुजशोभमानं
त्वां संस्मरेद् ध्वजगणाधिपते ! स धन्यः ॥

पिङ्गलगणपतिः ।

पक्वचूतफलकल्पमञ्जरीमिक्षुसारतिलमोदकैस्सह ।
उद्वहन्परशुहस्त ते नमः श्रीसहाययुत देवपिङ्गल ! ॥

उच्छिष्टगणपतिः ।

लीलाब्जं दाडिमं वीणाशाली[1] पुच्छाक्षसूत्रकम् ।
दधदुच्छिष्टनामानं गणेशं वीरमेव च ॥

(क्रियाक्रमद्योतौ ॥)

शरं धनुः पाशसृणी स्वहस्तैर्दधानमारक्तसरोरुहस्थम् ।
विवस्त्रपत्न्या सुरतप्रवृत्तमुच्छिष्टमम्बासुतमाश्रयेऽहम् ॥

चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥

(श्रीमन्मन्त्रमहार्णवे ॥)

विघ्नराजगणपतिः ।

पाशाङ्कुशौ धरन्नाम्रफलाशी चाखुवाहनः ।
विघ्नं विहन्तु नस्सर्वं रक्तवर्णो विनायकः ॥

लक्ष्मीगणेशः ।

बिभ्राणश्शुकबीजपूरकमलं माणिक्यकुम्भाङ्कुशा-
न्पाशं कल्पलतां च बाणकलिकास्रोतस्सरोनिस्सरः (?) ।

---

१. शालिपुञ्जेति स्यात् ।

श्यामो रक्तसरोरुहेण सहितो विद्वन्नयेनान्तिके (?)
गौराङ्गो वरदादिहस्तकमलो लक्ष्मीगणेशो महान् ॥
(क्रियाक्रमद्योतौ ॥)

दत्ताभये[1] चक्रधरौ[2] दधानं कराग्रगस्वर्णघटं त्रिनेत्रम् ।
धृताब्जयालिङ्गितमब्धिपुत्र्या लक्ष्मीगणेशं कनकाभमीडे ॥
(श्रीमन्मन्त्रमहोदधौ ॥)

महागणेशः ।

बिभ्राणोऽब्जकबीजपूरकगदा दन्तेक्षुचापैस्समं
बिभ्राणो मणिकुम्भशालिकणिशं पाशं च वक्त्रान्वितम् ।
गौराङ्ग्या रुचिरारविन्दयुतया देव्या सनाथान्तिक-
श्शोणाङ्गश्शुभमातनोतु भवतां नित्यं गणेशो महान् ॥

भुवनेशगणपतिः ।

शङ्केक्षुचापकुसुमेषुकवामदन्त-
पाशाङ्कुशैः कलममञ्जरिकासनाथैः ।
पाणिस्थितैः परिसमावृतभूषणश्री-
र्विघ्नेश्वरो विजयते कमनीयगौरः ॥

नृत्तगणपतिः ।

पाशाङ्कुशापूपकुठारदन्तचञ्चत्करं वलय.....मङ्गुलीयकम् ।
पीतप्रभं कल्पतरूरुहस्तं भजामि नृत्तैकपदं गणेशम् ॥

---

१. दन्ताभये इति स्यात् । २. चक्रधरमिति स्यात् ।

ऊर्ध्वगणेशः ।

कल्हारशालिकणिशेक्षुकचापबाण-
दन्तप्ररोहकभरः कनकोज्वलाङ्गः ।
आलिङ्गनोद्यतकरस्तटिदाभकव्या
देव्या दिशत्वभयमूर्ध्वगणेश्वरस्ते ॥

(क्रियाक्रमद्योतौ ॥)

प्रसन्नगणेशः ।

उद्यद्दिनेश्वररुचिं निजहस्तपद्मैः
पाशाङ्कुशाभयवरान्दधतं गजास्यम् ।
रक्ताम्बरं सकलदुःखहरं गणेशं
ध्यायेत्प्रसन्नमखिलाभरणाभिरामम् ॥

(श्रीमन्मन्त्ररत्नाकरे ॥)

उन्मत्तविनायकः ।

चतुर्भुजं रक्ततनुं त्रिनेत्रं पाशाङ्कुशौ मोदकपात्रदन्तौ ।
करैर्दधानं सरसीरुहस्थमुन्मत्तमुच्छिष्टगणेशमीडे ॥

(मन्त्रमहोदधौ ॥)

हरिद्रागणेशः ।

पाशाङ्कुशौ मोदकमेकदन्तं करैर्दधानं कनकासनस्थम् ।
हारिद्रखण्डप्रतिमं त्रिनेत्रं पीतांशुकं रात्रिगणेशमीडे ॥

(श्रीमन्मन्त्ररत्नाकरे ॥)

गणेशायतनम् ।

वामाङ्के गजकर्णं तु सिद्धिं दद्याच्च दक्षिणे ।
पृष्टिकर्णेस्तथाद्धौ (?) च धूम्रको बालचन्द्रमाः[1] ॥

उत्तरे तु सदा गौरी याम्ये चैव सरस्वती ।
पश्चिमे यक्षराजश्च बुद्धिः पुर्वसुसंस्थिता ॥

गणेशप्रतीहाराः ।

सर्वे च वामनाकारास्सौम्याश्च परुषाननाः ।
तर्जनी परशुः पद्ममविघ्नो दण्डहस्तकः ॥

तर्जनीदण्डापसव्ये स भवेद्विघ्नराजकः ।
तर्जनी खड्गखेटं तु दण्डहस्तस्सुवक्त्रकः ॥

तर्जनी दण्डापसव्ये दक्षिणे बलवान्भवेत् ।
तर्जनी बाणचापं च दण्डं च गजकर्णकः ॥

तर्जनी दण्डापसव्ये गोकर्णः पश्चिमे स्मृतः ।
तर्जनीपद्माङ्कुशं च दण्डहस्तः सुसौम्यकः ॥

तर्जनीदण्डापसव्ये स चैव शुभदायकः ।
पूर्वद्वारादिके सर्वे प्राच्यादिष्वष्ट संस्थिताः ॥

(रूपमण्डने ॥)

---

१. भालचन्द्रमा इति स्यात् ।

वैष्णवध्रुवबेराणि ।

वैष्णवध्रुवबेराणि ।

योगस्थानकमूर्तिः[1] ।

देवेशं श्यामाभं चतुर्भुजं शङ्खचक्रधरमभयकरदक्षिणहस्तं वरदं कट्यवलम्बितवामहस्तं दक्षिणे चैकजानुनासीनं भृगुं तथा वामे मार्कण्डेयं तथैव भूमिपुण्यार्चिते[2] वा दक्षिणे भित्तिपार्श्वे हेमाभं चतुर्भुजमक्षमालाकमण्डलुधरमभयकट्यवलम्बितहस्तं ब्रह्माणमुत्तराभिमुखमुत्तरे भित्तिपार्श्वे श्वेताभं चतुर्भुजं मृगपरशुधरमभयकट्यवलम्बितहस्तं शङ्करं दक्षिणाभिमुखं स्थितमेव कारयेत् ।

---

१. अनन्तशयनसंस्कृतग्रन्थप्रकाशनकार्यालयादानीतमादर्शद्वयमवलम्ब्य भूयसीनां वैष्णवप्रतिमानां लक्षणवाक्यानि वैखानसागमादुद्धृतानि । तस्मिन्नादर्शद्वये परस्परमर्थसाम्येऽपि भूयान्वचनव्यक्तिभेदस्समुपलभ्यते । तस्य सर्वस्यापि पाठान्तरतया प्रदर्शनं दुष्करमिति विलक्षणार्थवतामेव पदादीनां स्वरूपमधस्तादुपदर्श्यते । २. 'भूमिपुण्यार्चिते वामदक्षिणे' इति पाठान्तरम् ।

ब्रह्मशङ्कराभ्यां[1] हीनं मध्यमम् ।

पूजकमुनिभ्यां हीनमधमम्[2] ।

भोगस्थानकमूर्तिः ।

द्वितीयं भोगस्थानकं चतुर्भुजं श्यामाभं शङ्खचक्रधरमभयवरद-दक्षिणहस्तकट्यवलम्बितसिंहकर्णवामहस्तं तथा ब्रह्मेशौ, दक्षिणे श्रीदेवीं रुक्माभां स्वस्थिद[3]दक्षिणपादां किंचित्कुञ्चितवामपादां धृतकमल-दक्षिणहस्तां प्रसारितवामकरां देवं किंचित्समीक्ष्य स्थितां, वामे [4]हरिणीं श्यामाभां प्रसारितदक्षिणहस्तां धृतोत्पलवामहस्तां सुस्थित[5]वामपादां किंचित्कुञ्चितदक्षिणपादां[6] देवं किंचित्समीक्ष्य स्थितां कारयेत्[7]। देव्यो-र्हस्तौ पादौ विपरीतौ वा कारयेत्। दक्षिणे[8] भृगुं [9]दक्षिणजानुनासीनं वामेनोत्कुटिकमासीनं सपद्मवामहस्तं दक्षिणोरुनिहितदक्षिणकरं वामे पुराणं वामेन जानुनासीनं सपद्मदक्षिणहस्तं [वामोरुं] विन्यस्तवामकरं

---

१. एतत्पदादनन्तरं पूजकमुनिभ्यामित्यधिकमादर्शान्तरे दृश्यते । २. शङ्खचक्राभ्यां हीनमधममिति पाठान्तरम् । ३. सुस्थितेति भवितव्यम् । ४. 'हरिणी'मित्येतत्पदमादर्शान्तरे नास्ति । ५. सुस्थितेति पदमादर्शान्तरे न । ६. दक्षिणपादामित्येतदादर्शान्तरे न । ७. स्थितां कारयेदिति पदद्वयमादर्शा-न्तरे न । ८. दक्षिण इति पदात्पूर्वं 'कुब्यकौतुकयोर्मध्ये' इत्यादर्शान्तरे विद्यते । ९. दक्षिणजानुनेत्यारभ्य संपुटौ वा कारयेदित्यन्तस्य स्थाने 'एकजानुमासी-नमुत्कुटिकासनं वा वामे तथा पुराणमित्यन्यतरादर्शे दृश्यते ।

कारयेत् । एवमासयित्वा हस्तौ सम्पुटौ वा कारयेत् । भित्त्यूर्ध्वभागे[1] माया-संह्लादिनीभ्यां कामिनीव्याजनीभ्यां[2] तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां युक्तमुत्तमं[3] भोग-स्थानकम् ।

तुम्बुरुनारदाभ्यां[4] यक्षविद्याधराभ्यां हीनं मध्यमम् ।

सनकसनत्कुमाराभ्यामादित्यचन्द्राभ्यां पूजकमुनिभ्यां हीन-मधमम् ।

वीरस्थानकमूर्तिः ।

तृतीयं वीरस्थानकं देवं श्यामाभं[5] चतुर्भुजं[6] शङ्खचक्रधरं दक्षिणवामयोः ब्रह्मेशाभ्यां भृगुपुण्याभ्यां किष्किन्धसुन्दराभ्यां[7] सनक सनत्कुमाराभ्यां[8] सूर्यचन्द्राभ्यां युक्तमुत्तमं वीरस्थानकम् ।

किष्किन्धसुन्दराभ्यां[9] सनकसनत्कुमाराभ्यां हीनं मध्यमं वीरस्थानकम् ।

आदित्यचन्द्राभ्यां पूजकमुनिभ्यां हीनमधमं वीरस्थानकम् ।

---

१. अपरभित्त्यूर्ध्वेति पाठान्तरम् । २. व्याजकमुनिभ्यामिति पाठान्तरम् । ३. मध्यममिति पाठान्तरम् । ४. एतत्पदानन्तरमादर्शान्तरे ' किन्नरमिथुनाभ्यां हीनमधम'मिति विद्यते । ५. एतदादर्शान्तरे न । ६. एतत्पदात्पूर्वं ' देव्या सहे ' त्यादर्शान्तरे दृश्यते । ७. सुन्दरीभ्यामिति पाठान्तरम् । ८. एतत्पदात्पूर्व-मादर्शान्तरे 'व्याजकाभ्या'मित्यधिकं दृश्यते । ९. सुन्दरीभ्यामिति पाठान्तरम् ।

आभिचारिकस्थानकमूर्तिः ।

चतुर्थमाभिचारिकस्थानकं देवं द्विभुजं चतुर्भुजं वा धूमवर्णं श्यामवस्त्रधरं शुष्कवक्त्रं शुष्काङ्गं तमोगुणान्वितमूर्ध्वनेत्रं[1] ब्रह्मादि-देवैर्विवर्जितं पैशाचपद आर्द्राद्यनुक्तनक्षत्रे शर्वर्यां चरराशौ स्थापितं विमानं च लक्षणहीनं वा कारयेत् ।

योगासनमूर्तिः ।

अथ योगासनं वक्ष्ये । देवेशं श्वेताभं पीतवाससं चतुर्भुजं जटामौलिं श्वेतपद्मे समासीनमूर्ध्वस्थित[2]दक्षिणपादमधस्थवामपादमङ्क-विन्यस्तवामकरं शङ्खचक्ररहितपरभुजं श्वेतवस्त्रोत्तरीयं सोपवीतं कुण्ड-लाङ्गदहाराद्याभरणभूषितमीषन्निमीलितलोचनं च भित्तिपार्श्वे दक्षिणे ब्रह्माणमुत्तरे शङ्करमूर्ध्वभागे चन्द्रादित्यौ सनकसनत्कुमारौ [3]कौतुकाद्-क्षिणवामभागयोर्भृगुमार्कण्डेयौ तथा महीमार्कण्डेयौ वा कारयेत्तदुत्तमं योगासनम् ।

[4]चन्द्रादित्याभ्यां सनकसनत्कुमाराभ्यां हीनं मध्यमम् ।
भृगुमार्कण्डेयाभ्यां हीनमधमम् ।

---

१. आदर्शान्तरे ऊर्ध्वनेत्रमित्यस्य स्थाने 'नेतृ' इति दृश्यते । २. ऊर्ध्वे-त्यारभ्य परभुजमित्यन्तस्य स्थाने "दक्षिणे ऊर्ध्वमन्यमधस्स्थमेव ब्रह्मासनमासी-नमासयित्वाङ्के वामावामकरौ पल्लवौ विन्यस्य अन्यहस्तौ शङ्खचक्रौ विना नाकौ" इत्यादर्शान्तरे दृश्यते । ३. 'चक्रौ तु दक्षिणे' इति पाठान्तरम् । ४.'भृगुमार्कण्डेयाभ्यां हीनं मध्यमम्। चन्द्रादित्याभ्यां हीनं सनकसनत्कुमाराभ्यां हीनमधमं योगासन'मिति पुस्तकान्तरे विद्यते ।

भोगासनमूर्तिः ।

देवं सिंहासने समासीनं श्यामलाङ्गं चतुर्भुजं शङ्खचक्रधरमभयवरददक्षिणहस्तकटिविन्यस्तासिंहकर्णवामहस्तं [1]प्रसारितदक्षिणपादं दक्षिणे श्रियं देवीं वामपादमाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनां [2]वामपार्श्वे महीं देवीं दक्षिणं पादमाकुञ्च्य वामं प्रसार्य सिंहासनसमासीनामेतयोर्वामदक्षिणकरौ पद्मोत्पलधरावन्यहस्तौ सिंहासने निहितौ स्वोरुनिहितौ सिंहकर्णौ वा तद्विपरीतौ वा.....दक्षिणोत्तरयोर्ब्रह्मशङ्करौ तथासीनौ भृगुमार्कण्डेयौ चैकजानुक्रमेणासीनावन्यत्सर्वं[3] योगासनवत्कुर्यात् । [4]अपरभित्तिपार्श्वे मायासंह्लादिनीभ्यां तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां सनकसनत्कुमाराभ्यां सूर्यचन्द्राभ्यां [5]देवद्रुमसमायुक्तमुत्तमं भोगासनम् ।

तुम्बुरुनारदाभ्यां किन्नरमिथुनाभ्यां यक्षविद्याधराभ्यां हीनं मध्यमम् ।

सनकसनत्कुमाराभ्यामादित्यचन्द्राभ्यां पूजकमुनिभ्यां हीनमधमं भोगासनम् ।

---

१. 'पादेन्यस्ये'ति पाठान्तरम् । २. वामपार्श्व इत्यारभ्य समासीनामित्यन्तं पुस्तकान्तरे न दृश्यते । ३. 'अन्याभोगस्थानकव'दिति पाठान्तरम् । ४. एतत्पदमादर्शान्तरे न । ५. ' देवेन्द्रमौ च ' इति पाठान्तरम् ।

वीरासनमूर्तिः ।

[1]सिंहासनोपरिष्टात्पद्मासने वामपादं समाकुञ्च्य दक्षिणं किञ्चित्प्रसार्य समासीनं चतुर्भुजं शङ्खचक्रधरमभयदक्षिणहस्तं सिंहकर्णवामहस्तं प्रवालाभं श्यामाम्बरधरं पूजकस्थाने दक्षिणे श्रीदेवीं वामे महीदेवीमेकजानुक्रमेणासयित्वा दक्षिणे ब्रह्माणं मार्कण्डेयं[2] वामे शङ्करं भृगुं च गीर्वाण्यौ चामरधारिण्यौ च कारयेत् । सनकसनत्कुमाराभ्यां तुम्बुरुनारदाभ्यां सूर्यचन्द्राभ्यां सहितमुत्तमं वीरासनम् ।

[3]तुम्बुरुनारदाभ्यां सनकसनत्कुमाराभ्यां कामिनी[4]व्याजनीभ्यां हीनं मध्यमम् ।

[5]ब्रह्मशङ्कराभ्यां सूर्यचन्द्राभ्यां पूजकस्थाने देवीभ्यां हीनमधमं वीरासनम् ।

आभिचारिकासनमूर्तिः ।

देवं[6] वेदिकासने समासीनं द्विभुजं चतुर्भुजं वा नीलाभं श्यामवस्त्रधरं तमोगुणान्वितमूर्ध्वाक्षं [7]देव्यादीन्विना लक्षणहीने विमाने

---

१. सिंहासनेत्यारभ्य समासीनमित्यन्तमादर्शान्तरे न दृश्यते । २. मनुंचेति पाठान्तरम् । ३. एतत्पदात्पूर्वं ब्रह्मशङ्कराभ्यामित्यधिकमादर्शान्तरे दृश्यते ४. एतत्पदमादर्शान्तरे न । ५. एतत्पदमादर्शान्तरे न । ६. 'चतुर्थमाभिचारिकासनेनासीनं द्विभुज'मिति पाठान्तरम् । ७. 'देवादिदेवानां विने'ति पाठान्तरम् ।

शत्रुदिङ्मुखे कृष्णाष्टम्यामार्द्रार्द्यनुक्तनक्षत्रे रात्रै गर्भालये पैशाचपदे चरराशौ स्थापितमाभिचारिकासनम् ।

योगशयनमूर्तिः ।

अथ योगशय्याक्रमं वक्ष्ये । देवं द्विभुजमर्धार्धशयनं पीतश्यामं [1] दक्षिणहस्तमुपधाने न्यस्य मौल्यग्रं समुद्धृत्य सम्यक्प्रसार्य वान्यं समाकुञ्च्य तत्कोर्परमूर्ध्वं कृत्वा कटिमवलम्ब्याथवा तदूरौ प्रसार्य वा, पादं दक्षिणं प्रसार्य वाममाकुञ्च्य शयानं सर्वाभरणभूषितं किंचिदुन्मीलितलोचनं भृगुपुण्यार्चितं[2] पादपार्श्वे[3] मधुकैटभसंयुक्तं च नाभ्यम्बुजसमासीनं ब्रह्माणं पञ्चायुधान् गरुडं विष्वक्सेनं सप्तर्षींश्चापरभित्त्यूर्ध्वभागे प्राञ्जलीकृत्य स्थितान्दक्षिणभित्तिपार्श्वे ब्रह्माणं वामे शङ्करं च समासीनमेव कारयेत् । एतदुत्तमं योगशयनम् ।

सप्तर्षीन्विष्वक्सेनं च विना मध्यमम् ।
पूजकमुनिभ्यां मधुकैटभाभ्यां विनाधमं विज्ञायते ।

---

१. दक्षिणेत्यारभ्य प्रसार्य वा पादमित्यन्तस्य स्थाने 'दक्षिणे हस्त मुपधान्येन न्यस्तमौलिसीमान्ते समुद्धृतसम्यक्प्रसारितमन्यहस्तं समाकुञ्चित-कोर्परमूर्ध्वं कृत्वा कटकाङ्गुलीययुतमथवा तदूरुप्रसारितपादमित्यादर्शान्तरे दृश्यते । २. पुभ्यासार्चितामिति पाठान्तरम् । ३. पादेत्यादर्शान्तरे न ।

भोगशयनमूर्तिः ।

द्वितीयं भोगशयनं देवेशं श्यामलाङ्गं दर्शनीयं[1] सुपुष्टाङ्गं चतुर्भुजं [2]वार्धशयानं चापवद्वामं हस्तं दक्षिणमुपधाने निधाय मकुटमालम्ब्य किंचित्प्रसार्य वामं वामोरौ प्रसार्य दक्षिणं पादं प्रसार्य वाममाकुञ्च्य शयानं कारयेत् ।..... .....शिरःपार्श्वे श्रियं देवीं देवस्कन्धबाहुस्पर्शां[3] सपद्मदक्षिणहस्तां कटकवामहस्तां पादपार्श्वे[4] महीदेवीं वामाङ्घ्रिसंस्पर्शां हस्तेन दक्षिणेनोत्पलधृतां वामहस्तं कटकं कौतुकाद्दक्षिणे मार्कण्डेयं वामे भृगुं दक्षिणे भित्तिपार्श्वे चासीनं ब्रह्माणं वामे शङ्करं च दक्षिणे वक्रतुण्डं वामे विन्ध्यवासिनीं पादपार्श्वे मधुकैटभावुग्रवेगसमन्वितौ समुद्रतरङ्गच्छादितजानू अनन्तस्य विषज्वालाभिर्दह्यमानौ वा कारयेत् । नाभिपद्मे समासीनं ब्रह्माणं तद्दक्षिणे पञ्चायुधान् गरुडोपरिष्टाद्दक्षिणे भास्करमुत्तरे[5] निशाकरं तथा बालरूपिणौ तुम्बुरुनारदौ दक्षिणे[6]ऽश्विनावष्टलोकपालांस्तथाप्सरसश्च कारयेत् । एतदुत्तमं भोगशयनम् ।

तुम्बुरुनारदाभ्यां[7] लोकपालैश्च विना मध्यमम् ।
पूजकमुनिभ्यामप्सरोभिश्च विनाधमम् ।

---

१. आदर्शान्तरे न । २. 'वार्धार्धशायितं गात्रं चलवद्धस्त'मिति पाठान्तरम् । ३. देवस्य बाहुसंस्पर्शामिति पाठान्तरम् । ४. पादपार्श्वे इत्यारभ्य कटकमित्यन्तमादर्शान्तरे न । ५. दक्षिण इति पाठान्तरम् । ६. अदक्षिण इति पाठान्तरम् । ७. एतदनन्तरमश्विभ्यामित्यधिकमादर्शान्तरे दृश्यते ।

वीरशयनमूर्तिः ।

तृतीयं वीरशयनं देवं श्यामाभं चतुर्भुजं शङ्खचक्रधरं सव्यहस्तं शिरोपधानं कृत्वा वामहस्तं प्रसार्य शयानं पादपार्श्वे श्रीभूमिभ्यां पादमर्दकाभ्यां मधुकैटभाभ्यां संयुक्तं कौतुकाद्दक्षिणे मार्कण्डेयं वामे भृगुं नाभिपद्मे समासीनं ब्रह्माणं पञ्चायुधान् गरुडं चन्द्रादित्यौ सप्तर्षीन् द्वादशादित्यानेकादशरुद्रान् जयाद्यप्सरसस्तुम्बुरुनारदौ किन्नरमिथुने[1] सनकसनत्कुमारौ ब्रह्मेशौ[2] च कारयेदिति । तदुत्तमं वीरशयनम् ।

रुद्रादित्यैरप्सरोभिर्मुनिभिश्च विना मध्यमम् ।

किन्नरमिथुनाभ्यां सनकसनत्कुमाराभ्यां पूजकमुनिभ्यां हीनमधमम् ।

आभिचारिकशयनमूर्तिः ।

शेषशयनं लक्षणहीनं[3] द्विफणं द्विवलयमनुन्नतं शिरःपार्श्वे, देवं नीलाभं द्विभुजं[4] चतुर्भुजं वा समनयनं[5] महानिद्रासमायुक्तं शुष्कवक्त्रं शुष्काङ्गं श्यामवस्त्रधरं सर्वदेवैर्विहीनं[6] कारयेत् । एतदुत्तममाभिचारिकं शयनम् ।

---

१. आदर्शान्तरे 'किन्नरामिथुने' इति न । २. एतदादर्शान्तरे न । ३. 'सलक्षण' मिति पाठान्तरम् । ४. एतदादर्शान्तरे न । ५. समगयनमिति पाठान्तरम् । समशयनमिति स्यात् । ६. सर्वदेवानकविना चोत्तरमुखमाभिचारिकशयनमिति पाठान्तरम् ।

एकफणमेकवलयं[1] मध्यमम् ।
सर्पदेहं विना समस्थलशयनमधमम् ।
(वैखानसागमे ॥)

---

१. शयनमिति पाठान्तरम् ।

दशावताराः ।

दशावताराः ।

मत्स्यमूर्तिः ।

मत्स्यावतारिणं देवं मत्स्याकारं प्रकल्पयेत् ।

कूर्ममूर्तिः ।

कूर्मावतारिणं देवं कमठाकृतिमालिखेत् ॥

(शिल्परत्ने पञ्चविंशपटले ॥)

वराहः ।

आदिवराहं चतुर्भुजं शङ्खचक्रधरं सस्यश्यामनिभं[1] नागेन्द्र[2]-फणामणिस्थापितदक्षिणपादं तदूरौ महीं दधानं दक्षिणहस्तेन देव्योः पादौ गृह्णन्तं वामहस्तेन तामुपगृह्णन्तं मुखेन देवीं जिघ्रन्तं कृत्वा तां महीं प्राञ्जलीकृतहस्तां प्रसारितपादां पुष्पाम्बरधरां श्यामाभां किंचिद्देवं

---

१. सन्ध्याश्यामनिभमिति पाठान्तरम्। २. नागेन्द्रेत्यारभ्य कृत्वेत्यन्तस्य स्थाने 'पादं दक्षिणं सपत्नीकं नागेन्द्रस्य फणामणिस्थापितं वामकरस्थापि-कलामुत्क्रमणाय कुञ्चितविस्ताराभ्यां महीमादाय देवेशस्य आरूढाभ्यां द्वयो-स्संन्यस्य देवस्य हस्तेन दक्षिणे देव्याः पादौ गृहीत्वा तस्यापरभागे वामहस्तेन धारयन् देवस्य मुखेन देवीं जिघ्रन्तं वा कारयेत् ।' इत्यादर्शान्तरे दृश्यते ।

समीक्ष्य व्रीडाहर्षेण संयुक्तां सर्वाभरणसंयुतां देवस्य स्तनान्तां वा पञ्चतालेन मानेन कारयेत् ।

(वैखानसागमे षट्पञ्चाशपटले ॥)

नृवराहं प्रवक्ष्यामि सूकरास्येन शोभितम् ।
गदापद्मधरं धात्रीं दंष्ट्राग्रेण समुद्धृताम् ॥
बिभ्राणं कोर्परे वामे विस्मयोत्फुल्ललोचनाम् ।
नीलोत्पलधरां देवीमुपरिष्टात्प्रकल्पयेत् ॥
दक्षिणं कटिसंस्थं च बाहुं तस्य प्रकल्पयेत् ।
कूर्मपृष्ठे पदं चैकमन्यन्नागेन्द्रमूर्धनि ॥
अथवा सूकराकारं महाकायं क्वचिल्लिखेत् ।
तीक्ष्णदंष्ट्राग्रघोणास्यस्कन्धकर्णोर्ध्वरोमकम् ॥

(शिल्परत्ने पञ्चविंशपटले ॥)

नराङ्गो वाथ कर्तव्यो भूवराहो गदादिभृत् ।
दक्षिणे वामके शङ्खं लक्ष्मीर्वा पद्ममेव वा ॥
श्रीर्वामकूर्परस्था तु क्ष्मानन्तौ चरणानुगौ ।
वराहस्थापनाद्राज्यं भवाब्धितरणं भवेत् ॥

(अग्निपु० ४९ अ० ॥)

ऐश्वर्यसंनिरुद्धश्च वराहो भगवान् हरिः ।
ऐश्वर्यशक्त्या दंष्ट्राग्रसमुद्धृतवसुन्धरः ॥
नृवराहोऽथवा कार्यश्शेषोपरिगतः प्रभुः ।
शेषश्चतुर्भुजः कार्यश्चारुरत्नफणान्वितः ॥

आश्चर्यार्फुल्लनयनो देववीक्षणतत्परः ।
कर्तव्यौ सीरमुसलौ करयोस्तस्य यादव ! ॥

सर्पभोगश्च कर्तव्यस्तथैव रचिताञ्जलिः ।
आलीढस्थानसंस्थानस्तत्पृष्ठे भगवान्भवेत् ॥

वामारत्निगता तस्य योषिद्रूपा वसुन्धरा ।
नमस्कारपरा तस्य कर्तव्या द्विभुजा शुभा ॥

यस्मिन् भुजे धरा देवी तत्र शङ्खकरो भवेत् ।
अन्ये तस्य कराः कार्याः पद्मचक्रगदाधराः ॥

हिरण्याक्षशिरश्छेदचक्रोद्वृत्तकरोऽथवा ।
मृतोद्धतहिरण्याक्षस्सुमुखो भगवान्भवेत् ॥

मूर्तिमन्तमनैश्वर्यं हिरण्याक्षं विदुर्बुधाः ।
ऐश्वर्येणाविनाशेन स निरस्तोऽरिमर्दनः ॥

नृवराहोऽथवा कार्यो ध्याने कपिलवत्स्थितः ।
द्विभुजस्त्वथवा कार्यः पिण्डनिर्वपनोद्यतः ॥

समग्रक्रोडरूपेण बहुदानवमध्यगः ।
नृवराहो वराहश्च कर्तव्यः क्ष्माविदारणः ॥

(विष्णुधर्मोत्तरे ॥)

मत्स्यकूर्मौ स्वस्वरूपौ नृवराहो गदाम्बुजे ।
बिभ्रच्छ्यामो वराहास्यो दंष्ट्राग्रेणोद्धृतां धराम् ॥

(रूपमण्डने ॥)

प्रलयवराहः ।

वक्ष्ये प्रलयवराहं वामपादं समाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनं नीलाभं[1] शङ्खचक्रधरमभयदक्षिणहस्तमूरुप्रतिष्ठितवामहस्तं पीताम्बरधरं सर्वाभरणभूषितं कारयित्वा तस्य दक्षिणे देवीं महीं पादं वाममाकुञ्च्य दक्षिणं प्रसार्यासीनां श्यामाभां सर्वाभरणभूषितामुत्पलधरवामकरामासननिहितदक्षिणकरां किंचिद्देवं समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत् ।

यज्ञवराहः ।

अथ यज्ञवराहं श्वेताभं चतुर्भुजं शङ्खचक्रधरं वामपादं समाकुञ्च्य दक्षिणं प्रसार्य सिंहासने समासीनं पीताम्बरधरं सर्वाभरणभूषितं कारयित्वा तस्य दक्षिणे देवीं श्रियं हेमाभां वामपादं समाकुञ्च्य दक्षिणं प्रसार्यासीनां पद्मधरवामहस्तामासने निहितदक्षिणहस्तां वामपार्श्वे महीं देवीं सस्यश्यामनिभां दक्षिणपादमाकुञ्च्य वामं प्रसार्यासीनामुत्पलधरदक्षिणहस्तामासने निहितवामहस्तां देवं किंचित्समीक्ष्य विस्मयोत्फुल्ललोचनां कारयेत् । त्रयाणां वराहाणां तत्तद्रूपं कौतुकबिम्बं विष्णुं चतुर्भुजं वा कारयेत् ।

नरसिंहः ।

नारसिंहो द्विविधो गिरिजस्थूण[2]जश्चेति । तयोर्मुखं सिंहस्येवान्यन्नराकारं तस्य मूर्धादिपादतलान्तं सविंशतिशताङ्गुलं.....

---

१. नीलाभमित्यारभ्य प्रसार्यासीनामित्यन्तमादर्शान्तरे नास्ति ।
२. स्थूणाज इति भवितव्यम् ।

.....नारसिंहं देवं सिंहासने पादं दक्षिणं प्रसार्य वाममाकुञ्च्य समासीनं चतुर्भुजं शङ्खचक्रधरं कुन्देन्दुधवलप्रभं रक्तवस्त्रधरं सर्वाभरणभूषितं करण्डिकामकुटयुतं पूर्वं दक्षिणकरमभयं दधानं वामं कट्यवलम्बितमूरुस्थं वा कारयेत् । तद्दक्षिणे श्रियं देवीं वामपादमाकुञ्च्य दक्षिणं प्रसार्यासीनां पद्मधरवामहस्तामासने निहितदक्षिणहस्तां सुवर्णाभां सर्वाभरणभूषितां वामपार्श्वे महीं देवीं दक्षिणं पादमाकुञ्च्य वामं प्रसार्यासीनामुत्पलधरदक्षिणहस्तामासने निहितवामहस्तां श्यामाभां सर्वाभरणभूषितां कारयेत् । अथवा सिंहासनस्योर्ध्वे वामं पादं प्रसार्यान्यमाकुञ्च्य तज्जानूर्ध्वे दक्षिणहस्तं गजहस्तवत्प्रसार्य वाममूरौ संन्यस्यासीनं शङ्खचक्रधरं देवीभ्यां सहितं कारयेत् ।

केवलनरसिंहः ।

केवलं नृसिंहदेवं पद्मपीठोपरिष्टाद् द्वौ पादौ व्यत्ययेन न्यस्योत्कुटिकासनेनासयित्वोरुमध्ये वस्त्रेणाबध्य सर्वाभरणसंयुक्तं चतुर्भुजं शङ्खचक्रधरमन्यहस्तौ जानूपरिष्टात्प्रसारितौ[1] च कारयेत् ।

(वैखानसागमे ॥)

आसीनं द्विभुजं देवं प्रमत्तवदनेक्षणम् ।
श्वेतस्फटिकसङ्काशं चतुर्बाहुमथापि वा ॥

---

१. प्रसारितवियुक्तं वा संस्थापयेदिति पुस्तकान्तरे दृश्यते ।

आजानुलम्बिनौ बाहू कर्तव्यौ तत्र दक्षिणे ।
समीपे कल्पयेच्चक्रं वामे शङ्खं समीपतः ॥
ऊर्ध्वस्थिताभ्यां बाहुभ्यां दक्षिणे पङ्कजं न्यसेत् ।
वामे बाहौ गदामाम्यां[1] लिखेच्चित्रविशारदः ॥

(शिल्परत्नसंयोजिते कस्मिंश्चिद्ग्रन्थे ॥)

स्थौणनारसिंहः ।

अथ [2]स्थूणनारसिंहं सोपाधानसिंहासने[3] वामपादमाकुञ्च्यान्यं प्रसार्य समासीनं चतुर्भुजं शङ्खचक्रधरमभयक[4]दानदक्षिणहस्तमूरुप्रतिष्ठितवामहस्तं [5]सटास्कन्धसंयुक्तं तीक्ष्णदंष्ट्रेक्षणं भयानकं[6] श्वेताभं रक्ताम्बरधरं सर्वाभरणसंयुक्तं कारयेत्[7] । तस्य कोपशान्त्यर्थं पार्श्वयोर्दक्षिणवामयोः श्रीमह्लौ प्रह्लादं वन्दमानं च कारयेत् । दक्षिणे नारदं वीणाहस्तं भित्तिपार्श्वे परितः प्रागाद्यैशानान्तमिन्द्रादिलोकपालान्वन्दमानांश्च कारयेत् ।

(वैखानसागमे ॥)

---

१. 'गदां रम्या'मिति किमु स्यात्? २. स्थौणेति स्यात् । ३. सोपान इति पाठान्तरम् । ४. दक्षिणं पूर्वमभयमिति पाठान्तरम् । ५. एतदादर्शान्तरे नास्ति । ६. 'भयानकं चेद्भीमं रक्ताम्बरधर'मित्यादर्शान्तरे दृश्यते । ७. एतद्वाक्यादनन्तर 'मथवा षोडशद्वादशहस्तैर्युक्तं त्रिभागं स्थितं वामोरौ सुरेन्द्रं विन्यस्योरसि हस्ताभ्यां नखैर्भेदयित्वा दक्षिणभागे चैकैकाभयप्रदानमेकेन श्रोत्राङ्गुलीय विन्यस्यासं वामे चैकेन मकुटग्रहणमेकेन मुष्टिप्रहरणमन्यैर्दमनं वाशीघ्रां सतीत्येवमतिभयानकं कृत्वा' इत्यधिकमादर्शान्तरे विद्यते ।

नृसिंहस्याकृतिं वक्ष्ये रौद्रपिङ्गमुखेक्षणाम् ।
भुजाष्टकसमायुक्तां [1]स्कन्धपीनसमाश्रिताम् ॥

हिरण्यकशिपुं दैत्यं दारयन्तीं नखाङ्कुरैः ।
ऊरोरुपरि पीनस्य खड्गखेटकधारिणम् ॥

तस्यान्त्रमाला निष्कृत्य[2] बाहुयुग्मेन बिभ्रतीम्
मध्यस्थिताभ्यां बाहुभ्यां दक्षिणे चक्रपङ्कजौ ॥

कौमोदकीं गदां शङ्खं बाहुभ्यामिति वामतः ।
नीलोत्पलवदच्छायां[3] किं वा चम्पकसप्रभाम् ॥

तप्तकाञ्चनसङ्काशां बालार्कसदृशीं लिखेत् ।

(शिल्परत्ने पञ्चविंशपटले ॥)

नरसिंहो विवृत्तास्यो वामोरुक्षतदानवः ।
तद्वक्षो दारयन्माली स्फुरच्चक्रगदाधरः ॥

(अग्निपु० ४९ अ० ॥)

य एवं भगवान्विष्णुर्नरसिंहवपुर्धरः ।
ध्यानविधिस्स एवोक्तः परमज्ञानवर्धनः ॥

पीनस्कन्धकटिग्रीवः कृशमध्यः कृशोदरः ।
सिंहाननो नृदेहश्च नीलवासाः प्रभान्वितः ॥

---

१. पीनस्कन्धेति स्यात् । २. निष्कृष्येति भवितव्यम् । ३. दलेति स्यात् ।

आलीढस्थानसंस्थानस्सर्वाभरणभूषितः ।
ज्वालामालाकुलमुखो ज्वालाकेसरमण्डलः ॥
हिरण्यकशिपोर्वक्षः पाटयन्नखरैः खरैः ।
नीलोत्पलाभः कर्तव्यो देवजानुगतस्तथा ॥
हिरण्यकशिपुर्दैत्यस्तमज्ञानं विदुर्बुधाः ।

(विष्णुधर्मोत्तरे ॥)

नृसिंहस्सिंहवक्त्रोऽतिदंष्ट्रालः कुटिलोरुकः ।
हिरण्योरस्स्थलासक्तविदारणकरद्वयः ॥

(रूपमण्डने ॥)

यानकनरसिंहः ।

अथ यानकनरसिंहं वीशस्कन्धोपरिष्टाच्छेषोत्सङ्गे समासीनं तत्फणैः पञ्चभिः [छ*] नमौलिं चतुर्भुजं शङ्खचक्रधरं सर्वाभरणभूषितं कारयेत् । अथवाष्टाभिर्द्विरष्टाभिर्वा भुजैर्युक्तं भयानकं दैत्यवधानुरूपं नृसिंहं स्थूणजं कारयेत् ।

(वैखानसागमे ॥)

वामनः ।

अथ वामनं पञ्चतालमितिं[1] द्विभुजं छत्रदण्डधरं कौपीनवाससं शिखापुस्तकमेखलोपवीतकृष्णाजिनसमायुतं पवित्रपाणिं बालरूपं ब्रह्मवर्चस्विनं कारयेत् ।

(वैखानसागमे ॥)

---

१. एतदनन्तरं 'मूर्धादिपादतलान्तं षडङ्गुल' मित्यधिकमादर्शान्तरे दृश्यते ।

कृष्णाजिन्युपवीती स्याच्छत्री धृतकमण्डलुः ।
कुण्डली शिखया युक्तः कुब्जाकारो महोदरः ॥
(शिल्परत्ने पञ्चविंशपटले ॥)

छत्री दण्डी वामनस्स्यादथवा स्याच्चतुर्भुजः ।
(अग्निपु० ४७ अ० ॥)

कर्तव्यो वामनो देवस्सङ्कटैर्गात्रपर्वभिः ।
पीनगात्रश्च कर्तव्यो दण्डी चाध्ययनोद्यतः ॥
दूर्वाश्यामश्च कर्तव्यः कृष्णाजिनधरस्तथा ।
(विष्णुधर्मोत्तरे ॥)

वामनस्सशिखश्श्यामो दण्डी पीनोऽम्बुपात्रवान् ।
(रूपमण्डने ॥)

त्रिविक्रमः ।

[1]त्रिविक्रमस्त्रिविधः प्रोक्तो लोकेषु त्रिपदन्यासाद् भूलोकाक्रमणार्थं जानुमात्रमन्तरिक्षलोकाक्रमणार्थं नाभिमात्रं स्वर्गलोकाक्रमणार्थं ललाटमात्रं चोर्ध्वपादो भवेत् । एतेषु यथेष्टरूपं निश्चित्य पूर्ववच्चतुर्वि-

---

१. त्रिविक्रमं त्रिधा प्रोक्तं लोकेति पदविन्यासाद् भोलोकात्क्रमेण ललाटसीमान्तमुद्धृतमेतैर्यथेष्टानिरूपं निश्चित्य पूर्ववच्चतुर्विंशतिशताङ्गुलभेदेन देवं चतुर्भुजमष्टभुजं वा अष्टभुजं चेद्दक्षिणे चक्रासिशक्तिधरं वामे खेटकशार्ङ्ग हलमुसलधरमेवमष्टभुजं चतुर्भुजो दक्षिणे चक्रं वामे शङ्खं तद्विपरीतं स्ववामपादं दक्षिणं स्थितं वामं प्रसारितं दक्षिणमुत्तानकरं वामं प्रसारितपादेन सह प्रसारितं श्यामाभं रक्ताम्बरधरं सर्वाभरणभूषितं तत्पृष्ठे कल्पद्रुरिन्द्रच्छत्रधर-

शतितालविभागेन देवमष्टबाहुं चतुर्बाहुं वाष्टभुजे दक्षिणहस्ते चक्रशङ्खगदाशार्ङ्गहलधरं चतुर्भुजे दक्षिणहस्तेन चक्रधरं वामहस्तेन शङ्खधरमभयं वरदं वा दधानं दक्षिणहस्ते, प्रसारितपादेन प्रसारितवामहस्तं स्थितदक्षिणपादं प्रसारितोद्भूतवामपादं श्यामाभं रक्ताम्बरधरं सर्वाभरणभूषितं, तत्पृष्ठे कल्पद्रुमामिन्द्रश्छत्रमुभयोः पार्श्वयो र्जवनजलेशौ चामरधारिणौ तदूर्ध्वे दक्षिणे दिवाकरं वामे निशाकरं तथा सन्[1] सनकसनत्कुमारौ च कृत्वा प्रसारितपादस्योर्ध्वभागे ब्रह्माणं तत्पादं प्रगृह्य हस्ताभ्यां प्रक्षालयन्तं कृत्वा तत्स्रौतसीं गङ्गां श्वेताभां नाभेरूर्ध्वं शङ्करं प्राञ्जलीकृतहस्तं च कारयेत् । पादपार्श्वे नमुचिमंत्रममाणं (?) वामपार्श्वे क्रतुविघ्नकरं तं मुष्टिना प्रहरन्तं गरुडं, दक्षिणे वामनं तत्पार्श्वे बलिं हेमाभं सर्वाभरणभूषितं सपत्नीकं हर्षेण पाणिभ्यां हेमकलशमुद्धरन्तं तस्योर्ध्वे जाम्बवन्तं भेरीताडनपरं च कारयेत् । अत्रानुक्तं सर्वं भूभर्तुर्विधिना कारयेत् । त्रिविक्रमस्य कौतुकं विष्णुं चतुर्भुजमेव कारयेत् ।

(वैखानसागमे ॥)

मुभौ पार्श्वे जवनं जलेशौ चामरधारिणौ तदूर्ध्वे दक्षिणादिवामकरं दक्षिणे निशाकरं तथा सनकसन्यससनत्कुमारौ च प्रसारितभागस्य ऊर्ध्वपादे ब्रह्माणं तत्पादं प्रगृह्य हस्ताभ्यां प्रक्षालनं कृत्वा तच्छ्रोतस्योरुगणपार्श्वे तद्भागौ ऊर्ध्वमन्यत्सर्वं हरेरिव कारयेत् ।' इत्यादर्शान्तरे त्रिविक्रमलक्षणं दृश्यते । १. सन्यसमिति स्यात् ।

त्रिविक्रमक्रमं वक्ष्ये वामपादेन मेदिनीम् ।
आक्रामन्तं द्वितीयेन साकल्येन नभस्स्थलम् ॥

(शिल्परत्ने पञ्चविंशपटले ॥)

सजलाम्बुदसंकाशस्तथा कार्यस्त्रिविक्रमः ।
दण्डपाशधरः कार्यश्शङ्खचक्रगदाधरः ॥
शङ्खचक्रगदापद्माः कार्यास्तस्य सुरूपिणः ।
निर्देहास्ते[1] न कर्तव्याश्शेषं कार्यं तु पूर्ववत् ॥
एकोर्द्ध्ववदनः कार्यो देवो विष्फारितेक्षणः ।

(विष्णुधर्मोत्तरे ॥)

जामदग्न्यरामः ।

